# MAHAKAVYA, ALANKARA AND VRITTA

## BA SANSKRIT
## IV SEMESTER

## CORE COURSE

UNIVERSITY OF CALICUT
**SCHOOL OF DISTANCE EDUCATION**
CALICUT UNIVERSITY.P.O., MALAPPURAM, KERALA, INDIA – 673 635

# UNIVERSITY OF CALICUT

## SCHOOL OF DISTANCE EDUCATION

STUDY MATERIAL

# BA SANSKRIT

# IV SEMESTER

CORE COURSE

## MAHAKAVYA ALANKARA AND VRITTA

Prepared by:

Dr. Narayanan N.M.
Asst. Professor,
Department of Sanskrit
Sree Kerala Varma College,
Thrissur.

Scrutinised by:

Sri.K.Jayanarayanan,
Associate Professor,
Department of Sanskrit,
Sree Kerala Varma College,
Thrissur.

Layout & Settings

Computer Section, SDE

©

Reserved

# महाकविमाघप्रणीतं
# शिशुपालवधमहाकाव्यम् - प्रथमः सर्गः।

## १. सन्दर्भः

महाकविमाघप्रणीतं शिशुपालवधमहाकाव्यं संस्कृतसाहित्ये विरचितेषु महाकाव्येषु प्रमुखं महाकाव्यं भवति। विंशत्सर्गात्मकस्य अस्य महाकाव्यस्य प्रथमे सर्गे कृष्णनारदसम्भाषणं मुख्यरूपेण वर्णितं भवति। कृष्णस्य, अम्बरादवतरतो नारदमहर्षेर्दर्शनं प्रथमश्लोके वर्णितं भवति।

**श्लोकः**

श्रियः पतिः श्रीमति शासितुं जग-
ज्जगन्निवासो वसुदेवसद्मनि।
वसन् ददर्शावतरन्तमम्बराद्
हिरण्यगर्भाङ्गभुवं मुनिं हरिः।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| श्रियः पतिः | - | लक्ष्मीपतिः |
| जगन्निवासः | - | महाविष्णुः |
| जगत् शासितुं | - | लोकरक्षार्थं |
| श्रीमति वसुदेवसद्मनि | - | ऐश्वर्यपूर्णे वसुदेवगृहे |
| वसन् हरिः | - | वासं कुर्वन् कृष्णः |
| (कदाचित्) अम्बरात् | - | एकदा आकाशात् |
| अवतरन्तं | - | अधः आगच्छन्तं |
| हिरण्यगर्भाङ्गभुवं | - | ब्रह्मपुत्रं |
| मुनिं | - | नारदं |
| ददर्श | - | अपश्यत् |

**भावार्थः**

लक्ष्मीपतिः महाविष्णुः सकललोकसंरक्षणार्थं सर्वैश्वर्यसम्पन्ने वसुदेवस्य गृहे वासं कुर्वन् एकदा भगवद्दर्शनार्थं आकाशात् भूमिमवतरन्तं ब्रह्मपुत्रं नारदं अपश्यत्।

विरोधः अनुप्रासश्च अलङ्कारौ। प्रथमश्लोकादारभ्य चतुस्सप्तति पर्यन्तेषु श्लोकेषु वंशस्थं छन्दः तस्य लक्षणम् - "जतौतु वंशस्थमुदीरितं जरौ"।

## २. सन्दर्भः

भूमाववतरतः नारदस्य शोभां अद्भुतपरतन्त्राः जनाः सकुतुकं पश्यन्ति।

**श्लोकः**

गतं तिरश्चीनमनूरुसारथेः।

प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।

पतत्यधोधाम विसारि सर्वतः

किमेतदित्याकुलमीक्षितं जनैः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अनूरुसारथेः | - | अनूरुः, अरुणः यस्य सारथिः सूर्यस्य इत्यर्थः |
| गतं तिरश्चीनं | - | सङ्क्रमणं अनृजुः (भवति) |
| हविर्भुजः | - | अग्रेः |
| ऊर्ध्वज्वलनं | - | ऊर्ध्वदिशा प्रज्वलनं |
| प्रसिद्धम् | - | सुविदितम् |
| (इदं तु) सर्वतो विसारि | - | सर्वत्र प्रसरणात्मकः |
| धाम अधः पतति | - | तेजः नीचैः अवतरति |
| एतत् किं इति आकुलं | - | औत्सुक्येन |
| जनैः ईक्षितम् | - | तद्देशवासिभिः अवलोकितम् |

**भावार्थः**

नारददर्शने जनः अद्भुतपरतन्त्रा अभवन्। तेषामियं विचारगतिरासीत्। अरुणस्य सञ्चारपथः तिरश्चीनं भवतिः, अग्निः अर्ध्वमुखो भूत्वा एव प्रज्वलति, अत्रायं प्रकाशसमूहः सर्वत्र प्रसार्य अधः पतति, एतत् किमिति साकुतं जनाः पश्यन्ति।

श्लोकेस्मिन् व्यतिरेकालङ्कारः।

## ३. सन्दर्भः

कृष्णः तत्तेजः नारद इति अवगच्छति।

**श्लोक**

चयस्त्विषामित्यवधारितं पुरा

ततः शरीरीति विभाविताकृतिम्।

विभुर्विभक्तावयवं पुमानिति

क्रमादमुं नारद इत्यबोधि सः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| विभुः सः | - | भगवान् श्रीकृष्णः |
| पुरा | - | सर्वप्रथमं |
| त्विषां चयः | - | प्रकाशसमूहः |
| इति अवधारितं | - | इति अवगतं |
| ततः विभाविताकृतिं | - | अनन्तरं स्वरूपगोचरं |
| शरीरी इति | - | देहयुक्तं इति (अवधारितं) |
| (ततः) विभक्तावयवं | - | मानव इति (अवधारितम्) |
| पुमान् इति | - | मानव इति (अवधारितम्) |
| अमुं क्रमात् | - | तं रूपं क्रमेण |
| नारद इति | - | ब्रह्मपुत्र इति |
| अबोधिः | - | अभिजज्ञे |

**भावार्थः**

गगनादवरन्तं तं रूपं कृष्णः सर्वप्रथमं प्रकाशसमूह इति अवगतवान्, तदनन्तरं किञ्चिदपि समीपे आगत्य सः कोपि शरीरी इति अवधारितम्। पुनः विभिन्नावयवदर्शनेन सः कोपि मानव इत विविदे, क्रमेण तं रूपं देवर्षिर्नारद इति पूर्णतया अभिजज्ञे।

श्लोकेऽस्मिन् काव्यलिङ्गमलङ्कारः।

## ४. सन्दर्भः

अथ सप्तभिः श्लोकैः नारदं वर्णयति। प्रथमं नारदस्य शिवसादृश्यं परिकल्प्यते।

**श्लोक:**

नवानधोधो बृहतः पयोधरान्

समूढकर्पूरपरागपाण्डुरम्।

क्षणं क्षणोत्क्षिप्तगजोन्द्रकृत्तिना

स्फुटोपमं भूतिसितेन शम्भुना।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| नवान् | - | नूतनान् |
| बृहतः | - | स्थूलाः |
| पयोधरान् अधोधः | - | मेघानां किञ्चिदधोभागे स्थितं |
| समूढकर्पूरपरागपाण्डुरं | - | पिण्डिभूतः कर्पूररेणव इव श्वेतः |
| क्षणं | - | किञ्चित्कालं |
| क्षणोत्क्षिप्तगजेन्द्रकृत्तिना | - | ताण्डवसमये उत्क्षिप्तं गजेन्द्रस्य चर्मरूपवस्त्रं येन धृतं तेन |
| भूतिसितेन | - | भस्मधारिणा |
| शम्भुना | - | शिवेन |
| स्फुटोपमं | - | सुव्यक्तसादृश्यं |

(अमुं नारद इति अबोधि)

**भावार्थः**

भस्मधारिणा शिवेन सह नारदस्य सादृश्यं कथयति। नूतनानां स्थूलानाञ्च मेघानां अधः अवतरन्तः कर्पूररेणुसमूहइव श्वेतवर्णयुक्तस्य नारदस्य गजोन्द्रचर्म धारिणा भस्मधारिणा च शिवेन सह सादृश्यं कल्पयति अर्थात् कृष्णः नारदं शिवसमानं पश्यति।

अस्मिन् श्लोके उपमालङ्कारः।

## ५. शन्दर्भः

जटाधारिणो नारदस्य सादृश्यं वल्लीततियुक्तेन हिमालयेन सह कल्पयति।

**श्लोक:**

दधानमम्भोरुहकेसरद्युती-
र्जटाः शरच्चन्द्रमरीचिरोचिषम्।
विपाकपिङ्गास्तुहिनस्थलीरुहो
धराधरेन्द्रं व्रतती ततीरिव।।

**अन्वयः अर्थश्च:**

| | | |
|---|---|---|
| अम्भोरुहकेसरद्युतीः | - | कमलकेसरशोभायुक्तं |
| जटाः दधानं | - | केशकलापं धारयन्तं, |
| शरच्चन्द्रमरीचिरोचिषं | - | शरच्चन्द्ररश्मिसमानं प्रकाशितं |
| विपाकपिङ्गाः | - | परिणतपीतवर्णाः |
| तुहिनस्थलीरुहः | - | हिमभूमिषु वर्धमानाः |
| व्रततीतती (दधानं) | - | लतासमूहं धारयन्तं |
| धराधरेन्द्रं इव (स्थितं) | - | पर्वतराजं इव स्थितं |

**भावार्थ:**

कमलकेसरसमानां जटां धारयन्तं, शरच्चन्द्ररश्मिसमानं प्रकाशयुक्तं तं नारदं पीतवर्णयुक्तं हिमवद्भमिषु वर्धमानं वल्लीसमूहं धारयन्तं हिमालयमिव कृष्णः पश्यति।

श्लोकेस्मिन् उपमालङ्कारः।

**६. सन्दर्भ:**

नारदस्य बलरामसादृश्यं वर्णयति।

**श्लोक:**

पिशङ्गमौञ्जीयुजमर्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति।
सुवर्णसूत्राकलिताधराम्बरां
विडम्बयन्तं शितिवाससस्तनुम्।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| पिशङ्गमौञ्जीयुजं | - | पिङ्गलवर्णमेखलाधारिणं |
| अर्जुनच्छविं | - | धवलकान्तियुतं |
| अञ्जनद्युति | - | अञ्जनवर्णयुक्तः (कृष्णवर्णयुक्तः) |
| एणाजिनं वसानं | - | मृगचर्मधारिणं |
| सूवर्णसूत्राकलिताधराम्बरां | - | स्वर्णसूत्रबद्धां अधोवसनयुक्तां |
| शितिवाससः तनुं | - | बलरामस्य शरीरं |
| विडम्बयन्तं | - | अनुकुर्वन्तम् (अमुं नारद इत्यबोधि) |

**भावार्थ:**

श्लोकेऽस्मिन् नारदस्य बलरामेण सह सादृश्यं कल्पयति। कपिलवर्णमेखलाधारिणं धवलशोभायुक्तं अञ्जनशिलावत् रजतवर्णयुक्तः कृष्णमृगचर्म वसानं दधानां वलरामतनुं अनुवर्तन्तं अमुं नारद इति अवागमत्।

उपमालङ्गरः।

## ७. सन्दर्भः

नारदस्य यज्ञोपवीतं मेघमध्ये विद्युल्लतेव विभाति।

**श्लोक:**

विहङ्गराजाङ्गरुहैरिवायतै :
हिरण्मयोर्वीरुहवल्लितन्तुभिः।
कृतोपवीतं हिमशुभ्रमुच्चकैः
घनं घनान्ते तटितां गणैरिव।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| विहङ्गराजाङ्गरुहैः इव | - | गरुडकेशसमानैः इव |
| आयतैः | - | विस्तृतैः दीर्घैः वा |
| हिरण्मयोर्वीरुहवल्लितन्तुभिः | - | स्वर्णमय्यां भूम्यां उत्पन्नानां वल्लीनां सूत्रैः |
| कृतोपवीतं | - | निर्मितं यज्ञोपवीतं |
| हिमशुभ्रं | - | तुषारमिव श्वेतवर्णयुक्तं (अत एव) |

| | | |
|---|---|---|
| घनान्ते | - | मेघमध्ये |
| तडितां गणै: | - | विद्युल्लताभि: |
| उच्चकै घनमिव | - | बृहदाकारं मेघमिव |

**भावार्थ:**

अत्र नारदस्य यज्ञोपवीतं वर्णयति। गुरुडुकोशसमानै: इव विस्तृतै: दीर्घै:र्वा तथा स्वर्णभूमिषु सुमेरुपर्वतप्रान्तेषु उत्पन्नानां स्वर्णमयलतानां सूत्रै: निर्मितं यज्ञोपवीतं कासारमिव श्वेतवर्णयुक्तं भवति. अत एव तद्यज्ञोपवीतं मेघमध्ये विद्युल्लतेव राजते, तद्यज्ञोपवीतधारी नारद: बृहदाकारं मेघमिव अम्बरे विराजते इति भाव:।

उपमालङ्कार:

## ८. सन्दर्भ:

नारदस्य ऐरावतसादृश्यं वर्णयति।

**श्लोक:**

निसर्गचित्रोज्वलसूक्ष्मपक्ष्मणा
लसद्बिसच्छेदसिताङ्गसङ्गिना।
चकासतं चारुचमूरुचर्मणा
कुथेन नागेन्द्रमिवेन्द्रवाहनम्।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| निसर्गचित्रोज्वलसूक्ष्मपक्ष्मणा | - | स्वभावत एव बहुवर्णयुतेन सूक्ष्मरोमराजिना |
| लसद्बिसच्छेदसिताङ्गसंगिना | - | मृणालखण्ड इव श्वेतवर्णेन अङ्गे धारितेन |
| चारु चमूरुचर्मणा | - | शोभायुक्तेन कृष्णाजिनेन |
| कुथेन | - | चित्रवर्णयुक्तेन कम्बलेन |
| इन्द्रवाहनं | - | देवराजवाहनं |
| नागेन्द्रं इव | - | गजेन्द्रं इव |
| चकासतं | - | प्रशोभितं (अमुं नारद इत्यवोधि)। |

**भावार्थः**

कृष्णाजिनधारी नारदः चित्रवर्णकम्बलधारिणं ऐरावतमनुस्मरति। स्वभावत एव विविधवर्णयुतेन सूक्ष्मरोमराजिना, मृणालखण्ड इव श्वेतवर्णयुतेन कृष्णाजिनेन भूषितः नारदः विभिन्नवर्णयुक्तकम्बलधारिणं इन्द्रवाहनं ऐरावतमनुस्मरति।

उपमालङ्कारः।

## ९. सन्दर्भः

जपमालया नारदस्य शोभा द्विगुणीभवतीति श्लेके वर्णयति।

**श्लोकः**

अजस्रमास्फालितवल्लकीगुण-
क्षतोज्वलाङ्गुष्ठनवांशुभिन्नया।
पुरः प्रवालैरिव पूरितार्थया
विभान्तमच्छस्फटिकाक्षमालया।

**अन्वयः अर्थश्च**

अजस्रं - अनुस्यूतं

आस्फालितवल्लकीगुणक्षतोजवलाङ्गुष्ठ नखांशुभिन्नया वीणातन्त्रीणां परस्परघर्षणेन अङ्गुष्ठनखस्य रश्मिभिः सम्मिश्रया। (अत एव)

पुरः प्रवालैः - पुरोभागः मुक्ताफलैः

पूरिताधर्या इव - पूर्तीकृतया इव (स्थितया)

अच्छस्फटिकाक्षमालया - स्वच्छस्फटिकमालया

विभान्तं - सुशोभितं (अमुं नारद इत्यबोधि)

**भावार्थः**

सर्वदा वीणावादनतत्परो भवति नारदः। वीणावादनसमये वीणातन्त्रीणां घर्षणात् नारदस्याङ्गुष्ठः सुतरां प्रकाशयति। तन्निर्गताभिः रश्मिभिः शोभिता नारदवक्षस्थले धृता अक्षमाला नारदस्य शोभां संवर्धयति ईद्दशं शोभायुक्तं अमुं नारद इति कृष्णः अबोदि उत्प्रेक्षा तद्गुणञ्चात्र अलङ्कारौ।

## १०. सन्दर्भः

विभिन्नस्वरनिर्गमकारिणां महत्याख्यां स्ववीणां नारदः साकूतं पश्यति।

**श्लोकः**

रणद्भिराघट्टनया नभस्वतः
पृथग्विभिन्नश्रुतिमण्डलैः स्वरैः।
स्फुटीभवद्ग्रामविशेषमूर्च्छना-
मवेक्षमाणं महतीं मुहुर्मुहुः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| नभस्वतः | - | वायोः |
| आघट्टनया | - | सङ्घातेन |
| पृथक् रणद्भिः | - | व्यत्यतस्वरनिर्गमैः |
| विभिन्नश्रुतिमण्डलैः | - | भिन्नानांश्रुतीनां समूहैः |
| स्वरैः | - | षड्जादि स्वरविशेषैः |
| स्फुटीभवद्ग्रामविशेषमूर्च्छनां | - | आरोहणावरोहणक्रमेण ग्रामाणां मूर्च्छनानां वैशिष्ट्यं प्रकाशयतीं |
| महतीं | - | तदाख्यां वीणां |
| मुहुर्मुहुः | - | वारं वारं |
| अवेक्षमाणं | - | साकूतं पश्यन्तं (अमुं नारद इत्यबोधि) |

**भावार्थः**

वायुसङ्गमेन विभिन्नरुपेण शब्दं कुर्वद्भिः आरोहणावरोहणक्रमेण विभिन्नस्वरविशेषैः स्वरग्रामाणि मूर्च्छनाश्च स्पुटरूपेण प्रकाशयतीं महती नम्निकां स्ववीणां वारं वारं साकूतं पश्यन्तं अमुं नारद इति कृष्ण अवदधार।

अतिशयोक्तिः विभावनाचालङ्कारौ।

## ११. सन्दर्भः

नारदः कृष्णस्य भवनमाससाद।

**श्लोक:**

निवर्त्य सोऽनुव्रजतः कृतानती-
नतीन्द्रियज्ञाननिधिर्नभः सदः।
समासदन् सादितदैत्यसम्पदः
पदं महेन्द्रालयचारु चक्रिणः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अतीन्द्रियज्ञाननिधिः सः | - | दिव्यज्ञानयुक्तः नारदः |
| कृतानतीन् | - | नमस्कुर्वतः |
| अनुव्रजतः | - | अनुसरणं कुर्वतः |
| नभःसदः | - | देवान् |
| निवर्त्य | - | त्यक्त्वा |
| सादितदैत्यसम्पदः | - | विनाशितासुरसम्पदः |
| चक्रिणः | - | कृष्णस्य |
| महेन्द्रालयचारुः | - | इन्द्रभवनसमानं शोभायुक्तं |
| पदं समासदत् | - | गृहं समाजगाम। |

**भावार्थः**

इन्द्रियातीतविषयाणां ज्ञाननिधिः त्रिकालज्ञानी स नारदः कृताञ्जलीन् अनुसरतो देवान् प्रतिनिवर्त्य दैतेयसम्पद्विनाशकारिणे भगवतः श्रीकृष्णस्य इन्द्रभवनसमानं शोभायुक्तं गृहं प्राप।

## १२. सन्दर्भः

नारदस्य कृष्णसदनप्रापणात् पूर्वमेव कृष्णः आसनादुत्थाय तमानेतुं पुरो गच्छति।

**श्लोक:**

पतत्पङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि व्यलीयत।
गिरेस्तडित्वानिव तावदुच्चकै-
र्जवेन पीठादुदतिष्ठदच्युतः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| पतत्पतङ्गप्रतिमः | - | अधोगामीसूर्यसदृशः |
| तपोनिधिः | - | नारदः |
| अस्य पुरः | - | कृष्णस्य समक्षं |
| भुवि | - | भूमौ |
| यावत् न व्यलीयत | - | यदा न समापतत् |
| तावत् अच्युतः | - | तदा कृष्णः |
| गिरेः तडित्वान् इव | - | पर्वतात् वर्षमेघ इव |
| उच्चकैः पीठात् | - | उन्नतात् आसनात् |
| जवेन उदतिष्ठत् | - | झटिति उत्थितः |

**भावार्थः**

आकाशादधः पततः अस्तमनोन्मुखः सूर्य इव अधः अवतरतो महर्षिर्नारदः कृष्णसमक्षं यावत् भुवि पदविन्यासं न अकरोत् तावत् कृष्णः उन्नतात् आसनात् झटिति उत्थितः यथा पर्वतात् वर्षमेघः अर्ध्वं गच्छति। उपमालङ्कारः।

## १३. सन्दर्भः

कृष्णस्य पुरतः नारदः भूमौ अवातरत्।

**श्लोकः**

अथ प्रयत्नोन्नमितानमत्फणै-
धृते कथञ्चित्फणिनां गणैरधः।
न्यधायिषातामभिदेवकीसुतं
सुतने धातुश्चरणौ भुवस्तले।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अथ धातुः सुतेन | - | अनन्तरं ब्रह्मपुत्रेण |
| प्रयत्नोन्नमितानमत्फणैः | - | श्रमेण उत्थितैः पुनः नमितैश्च फणैः |
| फणिनां गणैः | - | शेषादिनागानां समूहैः |
| कथञ्चित् | - | येन केनापि प्रकारेण |

| | | |
|---|---|---|
| अधः धृते | - | नीचै कृते |
| भुवः तले | - | भौमोपरि |
| अभिदेवकीसुतं | - | देवकीपुत्रस्य पुरतः |
| चरणौ न्यधायिषाताम् | - | पदमकारयत् |

**भावार्थः**

अनन्तरं नारदः देवकीसुतस्य कृष्णस्य पुरतः भूमाववततार या भूमिः शेषादिसर्पगणैः कृच्छ्रेण स्वकीये फणमण्डले धार्यते तथैव तैरेवफणैः महर्षेः नमस्कारश्च क्रियते तस्यां पदं अकार्षीत्।

## १४. सन्दर्भः

विभिन्नैः पूजासामग्रिभिः कृष्णः नारदस्य स्वागतं व्याहरति।

**श्लोकः**

तमर्ध्यमर्ध्यादिकयादिपूरुषः
सपर्यया साधु स पर्यपूपुजत्.
गृहानुपैतुं प्रणयादभीप्सवो
भवन्ति नापुण्यकृतां मनीषिणः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| आदिपूरुषः सः | - | विष्णोरवताररुपः कृष्णः |
| अर्घ्यं तं | - | पूजार्हं नारदं |
| अर्घ्यादिकया सपर्यया | - | अर्घ्यपाद्यदिभिः पूजाद्रव्यैः |
| साधु | - | सम्यक् |
| पर्यपूपुजत् | - | पूजामकरोत् |
| मनीषिणः | - | बुद्धिमन्तः |
| अपुण्यकृतां | - | पुण्यकृतवतां |
| गृहान् | - | आलयं प्रति |
| प्रणयात् | - | प्रेमात् |
| उपैतुं | - | गन्तुं |
| अभीप्सवः न भवन्ति | - | इच्छवः न भवन्ति |

**भावार्थ**

विराट्पुरुषस्य विष्णोरवताररुपः कृष्णः सम्मान्याय नारदाय अर्घ्यपाद्याद्युपचारपूर्विकां अतिथिपूजां अप्रयच्छत्। त्याज्यग्राह्यविवेकबुद्धयः स्नेहात् दुश्चरित्रवतां जनानां गृहं प्रति गन्तुमिच्छवः न भवन्ति।

श्लोकेऽस्मिन् अर्थान्तरन्यासालङ्कारः।

## १५. सन्दर्भः

कृष्णः नारदं स्वाभिमुखे आसने उपाविशत्।

**श्लोकः**

न यावदेतावुदपश्यदुत्थितौ
जनस्तुषाराञ्जनपर्वताविव।
स्वहस्तदत्ते मुनिमासने मुनि-
श्चिरन्तनस्तावदभिन्यवीविशत्।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनः | - | प्रजा |
| उत्थितौ एतौ | - | स्थितौ कृष्णनारदौ |
| तुषाराञ्जनपर्वतौ इव | - | हिमाञ्जनपर्वताविव |
| यावत् न उदपश्यत् | - | यावन्न उत्प्रेक्षितवान् |
| तावत् चिरन्तनः मुनिः | - | तावत् पुराणो मुनिः नारायणः |
| स्वहस्तदत्ते | - | स्वभुजेन प्रदत्ते |
| आसने | - | आसन्दे (सिंहासने) |
| मुनिं अभिन्यवीविशत् | - | नारदं उपवेशितवान्। |

**भावार्थः**

प्रजा पुरोदृश्यमानौ कृष्णनारदौ यथाक्रमं अञ्जनतुषारपर्वताविव यावत् न उत्प्रेक्षितवान् तावत् पुरातनो मुनिः नारायणः स्वहस्तेन प्रदत्ते आसने नारदं उपवेशितवान्।

## १६. सन्दर्भः

कृष्णाभिमुखमुपविष्टो नारदः कृष्णस्य मुखकान्तिमास्वादयति।

**श्लोक:**

महामहानीलशिलारुचः पुरो
निषेदिवान् कंसकृषः स विष्टरे।
श्रितोदयाद्रेरभिसायमुच्चकै-
रचूचुरच्चन्द्रमसोऽभिरामताम्।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| महामहानीलशिलारुचः | - | इन्द्रनीलशिलावत् नितरां भासमानस्य |
| कंसकृषः पुरः | - | कंसहन्तुः (कृष्णस्य) पुरतः |
| उच्चकैः विष्टरे | - | उन्नते आसने |
| निषेदिवान् सः | - | उपविष्टः नारदः |
| अभिसायं | - | सायंकालाभिमुखं |
| श्रितोदयाद्रेः | - | उदयाचलमाश्रितस्य |
| चन्द्रमसः | - | चन्द्रस्य |
| अभिरामतां अचूचुरत् | - | शोभां चोरितवान्। |

भावार्थः

सिंहलद्वीपे विद्यमाना इन्द्रनीलशिला अत्यन्तं शोभायुक्ता भवति। तादृशेन्द्रनीलशिलावत् भासमानस्य कंसहन्तुः कृष्णस्य पुरतः उन्नते आसने उपविष्टो नारदः सायंकाले उदयाचलमाश्रितस्य चन्द्रस्य शोभां चोरितवान् अर्थात् नारद उदयाचलप्रविष्ट इन्दुरिव विभाति।

निदर्शनालङ्कारः।

## १७. सन्दर्भः

अतिथिसत्कारेण सन्तुष्टं नारदं दृष्ट्वा कृष्णः नितरां तुष्टिमनुबभूव।

**श्लोकः**

निधाय तस्यापचितिं प्रसेदुष,:
प्रकाममप्रीयत यज्वनां प्रियः
ग्रहीतुमार्यान् परिचर्यया मुहु-
र्महानुभावा हि नितान्तमर्थिनः।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| यज्वनां प्रिय: | - | यागकर्तॄणां यजमानानां इष्टकारी (कृष्णः) |
| प्रसेदुष: | - | प्रसन्नस्य |
| तस्य अपचितिं विधाय | - | नारदस्य पूजां कृत्वा |
| प्रकामं अप्रीयत | - | नितरां तोषं अनुबभूव |
| महानुभावा: | - | सज्जना: |
| आर्यान् | - | श्रेष्ठान् |
| परिचर्यया | - | सेवया |
| मुहुः ग्रहीतुं | - | पुनः प्रसादयितुं |
| नितान्तं अर्थिन:हि | - | सर्वदा इच्छुका (भवन्ति) |

**भावार्थ:**

यागकतॄणां यजमानानां इष्टदाता कृष्ण: अतिथिसत्कारेण प्रसन्नस्य नारदस्य पूजां कृत्वा नितरां तुष्टिं अनुबभूव। यतो हि सज्जना: महत: शुश्रूषया पुन: पुन: प्रसादयितुं इच्छुका भवन्ति।

श्लोकेऽस्मिन् अर्थान्तरन्यासालङ्कार:।

## १८. सन्दर्भ:

नारदस्य तीर्थजलक्षेपणं कृष्ण: सप्रश्रयं स्वीचकार।

**श्लोक:**

अशेषतीर्थोपहृता: कमण्डलो-
र्निधाय पाणावृषिणाभ्युदीरिता:।
अघौघविध्वंसविधौ पटीयसी-
र्नतेन मूर्ध्ना हरिरग्रहीदप:।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| अशेषतीर्थोपहृता: | - | सर्वेभ्य: तीर्थेभ्य: स्वीकृता: |
| कमण्डलो: | - | जलपात्रात् (उद्धृत्य) |
| पाणौ निधाय | - | हस्ते धृत्वा |
| ऋषिणा अभ्युदीरिता: | - | नारदेन प्रक्षिप्ता: (अत एव) |

| | | |
|---|---|---|
| अघौघविध्वंसविधौ | - | पापसमूहनिवारणे |
| पटीयसीः आपः | - | समर्थतराणि जलानि |
| हरिः | - | कृष्णः |
| नतेन मूर्ध्ना | - | नम्रशिरसा |
| अग्रहीत् | - | स्वीचकार |

**भावार्थः**

विभिन्नेभ्यः पुण्यतीर्थेभ्यः सङ्गृहीतान् जलपात्रात् स्वीकृत्य हस्ते धृत्वा नारदेन प्रोक्षितान् अत एव महापापनिवारणसमर्थान् जलबिन्दून कृष्ण भक्तिपूर्वं नम्रशिरसा स्वीचकार।

## १९. सन्दर्भः

नारदानुज्ञया कृष्णः स्वर्णमये आसने उपविशति।

**श्लोकः**

स काञ्चने तत्र मुनेरनुज्ञया
नवाम्बुदश्यामवपुर्न्यविक्षत।
जिगाय जम्बूजनितश्रियः श्रियं
सुमेरुशृङ्गस्य तदा तदासनम्।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| नवाम्बुश्चामवपुः | - | नीलमेघकान्तियुक्तः |
| सः | - | कृष्णः |
| मुनेरनुज्ञया | - | नारदस्यानुमत्या |
| काञ्चने यत्र (आसने) | - | सुवर्णमये यस्मिन् सिंहासने |
| न्यविक्षत | - | अपविष्टवान् |
| तद् आसनं तदा | - | तदेव सिंहासनं तस्मिन्नवसरे |
| जम्बूजनितश्रियः | - | जम्बूफलशोभायुक्तस्य |
| सुमेरुश्रृङ्गस्य | - | सुमेरुपर्वतशिखरस्य |
| श्रियं जिगाय | - | शेभां जनयामास |

**भावार्थः**

नीलमेघकान्तियुक्तः स कृष्णः नारदस्य अनुमत्या सुवर्णमये यस्मिन्नासने उपाविशत् तद् आसनं तदा जम्बूफलसमृध्या प्रकाशमानस्य सुमेरुपर्वतशिखरस्य शोभां जनयामास।

उपमा अनुप्रासश्चालङ्कारौ।

## २०. सन्दर्भः

पीताम्बरधारी कृष्णः बडवाग्निज्वालापरिवृतः समुद्र इव शुशोभ।

**श्लोकः**

स तप्तकार्तस्वरभास्वराम्बरः
कठोरताराधिपलाञ्छनच्छविः।
विदिद्युते बाडवजातवेदसः
शिखाभिराश्लिष्ट इवाम्भसां निधिः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| तप्तकार्तस्वराम्बरः | - | तप्तकाञ्चनसन्निभं वस्त्रं येन धृतं सः (पीताम्बरः) |
| कठोरताराधिपलाञ्छनच्छविः | - | पूर्णचन्द्रसमानं शोभायुक्तः |
| सः | - | कृष्णः |
| बाडवजातवेदसः शिखाभिः | - | बाडवाग्नेर्ज्वालाभिः |
| आश्लिष्टः | - | आवृतः |
| अम्भसां निधिः इव | - | समुद्र इव |
| दिदिद्युते | - | अभासत |

**भावार्थः**

तप्तकाञ्चनसन्निभं पतिम्बरं धृत्वा नारदसमक्षं उपविष्टः पूर्णचन्द्रस्य शोभायुक्तः कृष्णः बडवानलस्य ज्वालाभिः परिवृतः समुद्र इव अभासत।

अत्र पीताम्बरस्य बडवाग्निज्वालया, कृष्णस्य समुद्रेण च सादृश्यकथनात् उपमालङ्कारः।

## २१. सन्दर्भः

हरेः कृष्णवर्णस्य मिश्रणेन नारदस्य धवलिमा सुतरामवर्धत।

**श्लोकः**

रथाङ्गपाणेः पटलेन रोचिषा-

मृषित्विषः संवलिता विरेजिरे।

चलत्पलाशान्तरगोचरास्तरोः

तुषारमूर्तेरिव नक्तमंशवः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अम्भोरुहकेसरद्युतीः | - | क |
| रथाङ्गपाणेः | - | चक्रपाणेः (कृष्णस्य) |
| रोचिषां पटलेन | - | छवीनां समूहेन |
| संवलिताः | - | मिश्रिताः |
| ऋषित्विषः | - | मुनेस्तेजः |
| नक्तं | - | रात्रौ |
| तरोः | - | वृक्षस्य |
| चलत्पलाशान्तरः | - | प्रकम्पत्पर्णमध्ये दृश्यमानाः |
| तुषारमूर्तेः | - | चन्द्रस्य |
| अंशव इव | - | रश्मय इव |
| विरेजिरे | - | विरराज |

**भावार्थः**

सुदर्शनहस्तस्य कृष्णस्य प्रभापुञ्जेन सम्मिलिताः नारदस्य शरीरशोभाः रात्रौ कम्पनशीलानां वृक्षस्य पत्राणां मध्ये दृश्यमानाः हिमांशोः रश्मय इव शोभामावहति।

उपमालङ्कारः।

## २२. सन्दर्भः

कृष्णानारदयोः शीभामिश्रणेन तौ एकवर्णयुक्ताविव बभासे।

**श्लोक:**

प्रफुल्लतापिञ्छनिभैरभीषुभिः
शुभैश्च सप्तच्छदपांसुपाण्डुभिः।
परस्परेण छुरितामलच्छवी
तदैकवर्णाविव तौ बभूवतुः।

**अन्वय अर्थश्च**

| | | |
|---|---|---|
| प्रफुल्लतापिञ्छनिभैः | - | विकसिततमालपुष्पशोभायुक्तैः |
| सप्तच्छदपांसुपाण्डुभिः | - | सप्तपर्णपुष्परेणुरिव श्वेतवर्णैः |
| शुभैः च अमीषुभिः | - | शुभ्रैरन्योन्यरश्मिभिः |
| परस्परेण | - | परस्परं |
| छुरितामलच्छवी | - | मिलितनिर्मलकान्तियुक्तौ |
| तौ तदा | - | कृष्णनारदौ तत्समये |
| एकवर्णौ इव | - | समानवर्णयुक्ताविव |
| बभूवतुः | - | परिणतौ |

**भावार्थः**

कृष्णस्य श्यामलता नारदस्य धवलता च मिलित्वा तौ एकवर्णाविव विभाति यथा विकसिततमालपुष्पौ इव कृष्णवर्णैः सप्तपर्णकुसुमरेणुरिव श्वेतवर्णः शुभ्रैः परस्परशोभाभिः मिलितौ निर्मलकानतियुतौ तौ कृष्णनारदौ एकवर्णाविव अदृश्येताम्।

उत्प्रेक्षालङ्कारः।

## २३. सन्दर्भः

नारदस्यागमने कृष्णस्य निस्सीमं सन्तोषं वर्णयति –

**श्लोक:**

युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत।
तनौ ममुस्तत्र न कैटभद्विष–
स्तपोधनभ्यागमसम्भवा मुदः।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| युगान्तकालप्रतिसंहतात्मन: | - | कल्पान्तकाले स्वांशीकृतदेहिन: |
| कैटभाद्विष: | - | कैटभरिपो: |
| यस्यां तनौ | - | यस्मिन् शरीरे |
| जगन्ति | - | चतुर्दशलोक: |
| सविकासं आसत | - | विस्तरेण अतिष्ठन् |
| तत्र | - | तस्मिन् |
| तपोवनाभ्यागमसम्भवा | - | नारदस्य आगमनेन जाता: |
| मुद: | - | सन्तोष: |
| न ममु: | - | नान्तर्बभूव |

**भावार्थ:**

कल्पान्तकाले यदा प्रलय: आगच्छति तदा सर्वजीवजाला विष्णो: शरीरे व्यलीयन्ता। एवं स्वांशीकृतदेहिन: कैटभारे: यस्मिन् शरीरे चतुर्दशलोक: विस्तरेण व्यलीयन्त तस्मिन् शरीरे नारदस्य आगमनेन जात: सन्तोष: अन्तर्भवितुं न पारयति अर्थात् चतुर्दशलोकादधिक: सन्तोष: नारदागमनेन कृषणस्याभूत्।

अतिशयोक्तिरलङ्कार:।

## २४. सन्दर्भ:

नारदस्योपरि दृष्टिपातेन कृष्णस्य नेत्रे सन्तेषेण अशोभेताम्।

**श्लोक:**

निदाघधामानमिवाधिदीधितिं
मुदा विकासं मुनिमभ्युपेयुषी।
विलोचने बिभ्रग्दधिश्रितश्रिणी
स पुण्डरीकाक्ष इति स्पुटोऽभवत्।।

**अन्वय: अर्थश्च:**

| | | |
|---|---|---|
| निदाघधामानं इव | - | उष्णरश्मिनं सूर्यमिव |
| अधिदीधितिं | - | अधिकतेजसं |
| मुनिं अभि | - | नारदं अभिलक्ष्य |

| | | |
|---|---|---|
| मुदा | - | तोषेण |
| विकासं उपेयुषी | - | प्रफुल्लतामुपगते (अत एव) |
| अधिश्रितश्रिणि | - | प्राप्ततेजसी |
| विलोचने बिभ्रत् | - | नेत्रे परिणते |
| सः पुण्डरीकाक्षः | - | स विष्णुः कमललोचनः |
| इति स्पुटः अभवत् | - | इति अन्वर्थसंज्ञोऽभूत्। |

**भावार्थः**

तप्तभास्कर इव अतिप्रभावशालिनं नारदमभिमुखीकृत्य उपविशतः कृष्णस्य नेत्रे प्रफुल्लतामुपगते। अत एव तन्नेत्रप्रभया सः कृष्णः पुण्डरीकाक्ष इति सार्थकनामा अभवत्। मुनिं दृष्ट्वा कृष्णस्य नेत्रे सूर्यतेजसा कमलमिव प्रफुल्लतामुपयातीत्यर्थः।

अस्मिन् श्लोके काव्यलिङ्गस्य उपमायाश्च दर्शनात् सङ्करालङ्कारः।

## २५. सन्दर्भः

अथ कृष्णः सस्मितं नारदेन सह भावणमारभत।

**श्लोकः**

सितं सितिम्ना सुतरां मुनेर्वपुः
विसारिभिः सौधमिवाथ लम्भयन्।
द्विजावलिव्याजनिशाकरांशुभिः
शुचिस्मितां वाचमवोचदच्युतः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अम्भोरुहकेसरद्युतीः | - | क |
| अथ अच्युतः | - | द्वयोरुपवेशनानन्तरं कृष्णः |
| विसारिभिः | - | अत्याधिकं प्रसरद्भिः |
| द्विजावलिव्याजनिशाकरांशुभिः | - | चन्द्रप्रभेव दन्तपंक्तिभिः |
| सितं मुनेः वपुः | - | धवलं नारदस्य शरीरं |
| सौधं इव | - | प्रासादं इव |
| सुतरां | - | अत्यधिकं |

| | | |
|---|---|---|
| सितिम्ना लम्भयन् | - | धावल्येन प्रकाशयन् |
| शुचिस्मितां | - | स्मितसहितां |
| वाचं अवोचत् | - | वाणीमभाषत |

**भावार्थः**

कृष्णनारदयोः सभायां उपवेशनानन्तरं सस्मितं कृष्णः भाषणमारभत। तदवसरे चन्द्रप्रभा इव भासमानाभिः कृष्णस्य दन्तपङ्क्तिभिः नारदस्य शरीरं चन्द्रिकया प्रासाद इव नितरामभासत। एवं दन्तपंक्तिनः अतिधावल्येन नारदं प्रकाशयन् कृष्णः एवं वक्तुमारभत।

अत्र संसृष्टिरलङ्कारः।

## २६. सन्दर्भः

नारदस्य दर्शनं कृष्णस्य कृते अत्यधिकं श्रेयस्करं भवतीनि कृष्णः कथयति।

**श्लोकः**

हरत्यघं सम्प्रति हेतुरेष्यतः
शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यताम्।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| भवदीयदर्शनं | - | भवतां दर्शनं |
| शरीरभाजां | - | दर्शनं कुर्वतां |
| कालत्रितये अपि | - | भूतादिकालत्रये अपि |
| योग्यतां व्यनक्ति | - | सम्मान्यतां प्रकाशयति |
| सम्प्रति | - | दर्शनकाले |
| अघं हरति | - | पापं नाशयति |
| एष्यतः शुभस्य हेतुः | - | भविष्यमाणस्य शुभस्य कारणं |
| पूर्वाचरितैः | - | पूर्वं अनुष्ठितैः |
| शुभैः कृतम् | - | सुकृतस्य फलम् |

**भावार्थः**

कृष्णः नारददर्शनस्य आह्लादं प्रकाशयति। कृष्णः कथयति यन्नारदस्य दर्शनं दर्शकानां श्रेयस्करं भवति। तत् भूतादिकालत्रयेऽपि तस्य सम्मान्यतां अभिव्यनक्ति अपि च दर्शनकाले एव सर्वानपि पापान् नाशयति। भविष्यमाणस्य शुभफलस्य कारणं भवति। पूर्वं कृतानां सत्कर्मणां सत्फलं भवति।

काव्यलिङ्गमलङ्कारः।

## २७. सन्दर्भः

संसारस्य अज्ञानान्धकारं नारदो निवारयतीति कृष्णः कथयति।

**श्लोकः**

जगत्यपर्याप्तसहस्रभानुना
न यन्नियन्तुं समभावि भानुना।
प्रसह्य तेजोभिरसङ्ख्यतां गतैः
अदस्त्वया नुन्नमनुत्तमं तमः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जगति | - | संसारे |
| अपर्याप्तसहस्रभानुना | - | अपर्याप्तसहस्ररश्मिणा |
| भानुना | - | सूर्येण |
| यत् तमः | - | यः अन्धकारः |
| नियन्तुं न समभावि | - | रोद्धुं न पारयति |
| अनुत्तमं अदः तमः | - | अद्वितीयं अयमन्धकारः |
| असंख्यतां गतैः | - | अगण्यतां गतैः |
| तेजोभिः | - | प्रभावैः |
| प्रसह्य | - | बलात् |
| त्वया नुन्नम् | - | त्वया छिन्नम् |

**भावार्थः**

सूर्यः सहस्रसंख्याकैः किरणैः यः अन्धकारः रोद्धं न पारयति, अनितरसाधारणः अयं अज्ञानरूपान्धकारः असंख्यैः तपः प्रभावैः बलात् त्वया छिन्नं भवति। अर्थात् नारदस्य तपप्रभावः अज्ञानतिमिरनिवारको भवति।

व्यतिरेकालङ्कारः।

## २८. सन्दर्भः

वेदानां प्रचारणप्रसारणार्थं सृष्टिकर्ता नारदाय वेदान् उपादिशत्।

**श्लोकः**

कृतः प्रजाक्षेमकृता प्रजासृजा
सुपात्रनिक्षेपनिराकुलात्मना।
सदोपयोगेपि गुरुस्त्वमक्षयो
निधिः श्रुतीनां धनसम्पदामिव।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| प्रजाक्षेमकृता | - | जनानां अभ्युदयकारिणा |
| सुपात्रनिक्षेपनिराकुलात्मना | - | सत्पात्रनिक्षेपात् निश्चिन्तेन |
| प्रजासृजा त्वं | - | ब्रह्मणा नारदः |
| धनसम्पदामिव | - | अमूल्यनिधिमिव |
| श्रुतीनां उपयोगे अपि | - | वेदानां अध्ययनप्रचारणादौ अपि |
| अक्षयः गुरुः | - | अनन्तः बृहच्च |
| निधिः कृतः | - | निक्षेपः कृतः |

**भावार्थः**

सृष्टिकर्त्रा ब्रह्मणा वेदानां प्रचारणार्थं तान् नारदाय उपादिशत्। जनानां अभ्युदयकारिणा सत्पात्रे नारदे निक्षेपात् निश्चिन्तेन च ब्रह्मणा वेदवेदाङ्गादीनां अध्ययनप्रचरणार्थं तेषां बृहत् अनन्तश्च निक्षेपः आमूल्यनिधिमिव नारदाय ते उपदिष्टः।

## २९. सन्दर्भः

नारदस्य अर्थपूर्णा वाणीं श्रोतुं कृष्णः स्वकीयामुत्सुकतां तस्य पुरतः प्रकाशयति।

**श्लोकः**

विलोकनेनैव तवामुना मुने
कृतः कृतार्थोऽस्मि निबर्हितांहसा।
तथापि शुश्रूषुरहं गरीयसी-
र्गिरोथवा श्रेयसि केन तृप्यते।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| हे मुने | - | हे महर्षे |
| निबर्हितांहसा | - | अपहृतपापेन |
| अमुना तव विलोकनेनैव | - | अनेन तव दर्शनेन एव |
| कृतार्थः कृतः अस्मि | - | उद्दिष्टकार्यसिद्धः अस्मि |
| तथापि अहं | - | कृष्णः |
| तव गिरः शुश्रूषुः | - | नारदस्य वाणीं श्रोतुमिच्छुः |
| अथवा श्रेयसि | - | अभ्युदये |
| केन तृप्यते | - | कः सन्तृप्तो भवति। |

**भावार्थः**

कृष्णस्य नारदं प्रति इयमुक्तिः। हे महर्षे सकलपापनिवारणकुशलेन तव दर्शनेनैव अहं कृतार्थो भवामि। तथापि अहं भवतां अर्थपूर्णां वाचं श्रोतुमिच्छामि। अथवा श्रेयस्करे विषये कस्यापि तृप्तिः पूर्णा न भवति अर्थात् अहं केवलं भवतां दर्शनेन सन्तुष्टो न भवामि किन्तु भवतां वाचमपि श्रोतुं उत्सुको भवामीत्यर्थः।

अस्मिन् श्लोके अर्थान्तरन्यासालङ्कारः।

## ३०. सन्दर्भः

स्वकीयमागमनोद्देशं वक्तुं नारदं कृष्णः प्रार्थयते।

**श्लोकः**

गतस्पृहोप्यागमनप्रयोजनं
वदेति वक्तुं व्यवसीयते यया।
तनोति नस्तामुदितात्मगौरवो
गुरुस्तवैवागम एव धृष्टताम्।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| गतस्पृहः अवि | - | वैराग्यवानपि |
| आगमनप्रयोजनं वद | - | अगमनोद्देशं ब्रूहि |

| | | |
|---|---|---|
| इति वक्तुं | - | कथयितुं |
| यया व्यवसीयते | - | येन धैर्येण उद्यम्यते |
| नः तां धृष्टतां | - | अस्माकं तं धैर्यं |
| उदितात्मगौरवः | - | स्फुरितस्वमहिमा |
| गुरुः | - | श्रेष्ठः |
| एव तवागमः | - | भवतां आगमनं |
| एव तनोति | - | विस्तारयति |

**भावार्थः**

सर्वसङ्गपरित्यागी अपि आगमनोद्देशं कथय इति वक्तुं अहं येन धैर्येण उद्यम्यते तं धैर्यं वर्धितस्वात्मप्रभावः श्रेष्ठः एव भवतां अयं आगम एव विस्तारयति। भवतामागमनेन अस्माकं धैर्यं द्विगुणीकृतमिति भावः।

## ३१. सन्दर्भः

अथ नारदः इत्थं वक्तुमारभत।

**श्लोकः**

इति ब्रुवन्तं तमुवाच स व्रती
न वाच्यमित्थं पुरुषोत्तम त्वया।
त्वमेव साक्षात्करणीय इत्यतः
किमस्ति कार्यं गुरु योगिनामिति।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| इति ब्रुवन्तं तं | - | इत्थं कथयन्तं कृष्णं |
| स व्रती उवाच | - | स मुनिरकथयत् |
| हे पुरुषोत्तम | - | हे महाविष्णो |
| त्वया इत्थं न वाच्यम् | - | एवं भवता न वक्तव्यम् |
| योगिनां अपि | - | मुमुक्षूणां अपि |
| त्वं एव साक्षात्करणीयः | - | प्रत्यक्षीकरणीयः |
| इत्यतः गुरुकार्यं किं अस्ति | - | इतोऽप्यधिकं विशिष्टकार्यं किमस्ति |

**भावार्थः**

इत्थमागमनोद्देशं पृच्छति कृष्णे नारदः तमुवाच। हे विराट्पुरुषस्वरुप एतादृशवाक्यं भवता न कथनीयम्। कुत इति चेत् योगिनः अपि सर्वदा भवत्साक्षात्काराय प्रयतन्ते, तस्मात् श्रेष्ठं किं कार्यं अस्माकमस्ति? भगवत्साक्षात्कारात् परं किमपि कार्यं नास्तीत्यर्थः।

## ३२. सन्दर्भः

मुमुक्षूणां आत्यन्तिको लक्ष्य आत्मरुपस्य तव साक्षात्कार एवेति नारदः कृष्णं वदति।

**श्लोकः**

उदीर्णरागप्रतिरोधकं जनै-
रभीक्ष्णमक्षुण्णतयातिदुर्गमम्।
उपेयुषो मोक्षपथं मनस्विन-
स्त्वमग्रभूमिर्निरपायसंश्रया।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| उदीर्णरागप्रतिरोधकं | - | वर्धितविषयसुखनिरोधकं |
| अभीक्ष्णं | - | नित्यं (शाश्वतं) |
| अक्षुण्णतया | - | अननुभूतत्वात् |
| जनैः | - | मुमुक्षुभिः |
| अतिदुर्गमं | - | अतिकठिनं |
| मोक्षपथं उपेयुषः | - | मुक्तिमार्गं प्राप्तवतः |
| मनस्विनः | - | धीरस्य |
| त्वं | - | भवान् |
| निरपायसंश्रया | - | पुनर्जन्मरहितमोक्षप्राप्तेः |
| अग्रभूमिः असि | - | प्राप्यस्थानं भवसि। |

**भावार्थः**

लौकिकसुखभोगनिरोधकं शाश्वतं अनुभवराहित्यात् मुमुक्षुभिः अतिकठिनतया प्राप्तुं योग्यं मुक्तिमार्गं प्राप्तवतः धीरस्य योगिनः पुनर्जन्मरहितमोक्षप्राप्तेः प्राप्यस्थानं भवानेव भवति।

## ३३. सन्दर्भः

कृष्णः सांख्यमतानुसारेण प्रकृतिभिन्नः पुरुषः भवतीति नारदः कथयति।

**श्लोक:**

उदासितारं निगृहीतमानसै-
गृहीतमध्यात्मदृशा कथञ्चन।
बहिर्विकारं प्रकृते: पृथग्विद:
पुरातनं त्वां पुरुषं पुराविद:।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| पुराविद: | - | पूर्वजा विद्वांस: |
| त्वां | - | भवन्तं (कृष्णम्) |
| अध्यात्मदृशा | - | आत्मविद्याज्ञानेन |
| कथञ्चन गृहीतं | - | येन केनापि प्रकारेण स्वायत्तीकृतं |
| उदासितारं | - | उदासीनरुपं |
| बहिर्विकारं | - | महदादिभ्य: पृथग्भूतं |
| पुरातनं | - | आदिमं |
| पुरुषं विदु: | - | आत्मस्वरूपं जानन्ति |

**भावार्थ:**

आत्मज्ञानिन: अस्मत्पूर्वजा महर्षिवर्या: भवन्तं, नियन्त्रितमनोवृत्तिभि: जितेन्द्रियै: आत्मविद्याज्ञानेन येन केनापि प्रकारेण स्वायत्तीकृतं उदासीनरुपं सांख्यमतोक्तेभ्य: महदहङ्कारादिभ्य: पृथग्भूतं आदिमं सांख्यपुरुषं अवगच्छन्ति।

## ३४. सन्दर्भ:

वराहावतारे त्वं भूमिमुद्धृत्य आदिशेषस्य फणोपरि अस्थापय: इति नारद: कृष्णं वदति।

**श्लोक:**

निवेशयामासिथ हेलयोद्धृतं
फणाभृतां छादनमेकमोकस:।
जगत्रयैकस्थपतिस्त्वमुच्चकै-
रहीश्वरस्तम्भशिरसु भूतलम्।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| जगत्रयैकस्थपति: त्वं | - | विश्वैकशिल्पी भवान् |
| हेलया उद्धृतं | - | दन्तेन उत्थापितं |

| | | |
|---|---|---|
| फणाभृतामोकस: | - | सर्पाणामाश्रयस्थानस्य |
| एकं आच्छादनं | - | आवरणं |
| भूतलं | - | पृथिवीतलं |
| उच्चकै: | - | उन्नतेषु |
| अहीश्वरस्तम्भशिर:सु | - | सर्पराजफणेषु |
| निवेशयामासिथ | - | निवेशितवान् |

**भावार्थ:**

त्रैलोक्यनिर्माता भवान् वराहावतारसयम स्वदंष्ट्रेण उत्थापितं सर्पाणामाश्रयस्थानस्यावरणरूपं पृथ्वितलं उन्नतेषु आदिशेषफणेषु निवेशयामास। वराहरूपी विष्णुः पातालस्यावरणरूपां पथिवीं उत्थाय शेषनगफणेषु स्थापितवानिति भाव:।

## ३५. सन्दर्भ:

भवतां यथार्थमहिमा येन केनाप्यवगन्तुं न शक्यते इति नारद: कथयति।

**श्लोक:**

अनन्यगुर्वस्तव केन केवल:
पुराणमूर्तेर्महिमावगम्यते।
मनुष्यजन्मापि सुरासुगरान् गुणै-
र्भवान्भवच्छेदकरै: करोत्यध:।।

**अन्वय: अर्थश्च**

| | | |
|---|---|---|
| अनन्यगुर्वा: | - | अद्धितीयप्रधाना: |
| तव पुराणमूर्ते: | - | तव आदिपुरुषस्य |
| केवल: महिमा | - | वास्तविकी महिमा |
| केन अवगम्यते | - | केन ज्ञायते |
| मनुष्यजन्मा अपि | - | मानवस्वरुप: अपि |
| भवान् | - | कृष्ण: |
| भवच्छेदकरै: गुणै: | - | संसारदु:खनिवारणात्मकै: गुणै: |
| सुरासुरान् | - | देवदानवान् |
| अध: करोति | - | न्यूनीकरोति |

**भावार्थः**

अद्वितीयप्रभावशालिनः आदिपुरुषस्य भवतां वास्तविकी महिमा येन केनाप्यवगन्तुं न शक्यते। मानवस्वरूपः अपि भवान् संसारदुःखनिवारणात्मकैः आत्मज्ञानादिभिर्गुणैः देवदानवान् अप्यतिशेते।

## ३६. सन्दर्भः

महीभारापनयनं कर्तुमागतस्य भवतः समक्षमेव भूभारं वर्धते इति नारदः कृष्णं स्मारयति।

**श्लोकः**

लघूकरिष्यन्नतिभारभङ्गुरा-
ममूं किल त्वं त्रिदिवादवातरः।
उदूढलोकत्रितयेन साम्प्रतं
गुरुर्धरित्री क्रियतेतरां त्वया।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| भवदीयदर्शनं | - | भ |
| त्वं अतिभारभङ्गुरां | - | अतिभारेण भञ्जमानां |
| अमूं लघूकरिष्यन् | - | धरित्रीं लघ्वीकर्तुं |
| त्रिदिवात् अवातरः किल | - | स्वर्गात् अवतारं कृतवान् |
| साम्प्रतं | - | अधुना |
| उदूढलोकत्रितयेन | - | धृतत्रिलोकेन |
| त्वया धरित्री | - | भवता भूमिः |
| गुरुः क्रियतेतराम् | - | भारभूता क्रियते |

**भावार्थः**

दानवानां अतिभारेण कष्टमनुभूयमानां पृथिवीं एतादृशात् कष्टात् मोक्तुं भवान् स्वर्गात् भूमौ अवतारं कृतवान् किल? अधुना लोकत्रितयं स्वकीयन्तर्भागे धृतवता भवता इयं भूमिः अतिशयेन वर्धितभारा क्रियते।

## ३७. सन्दर्भः

मादृशाः साधारणमर्त्याः भवतो रूपं भूमाववतारकारणादेव द्रष्टुं समर्था भवन्ति।

**श्लोकः**

निजौजसोज्जासयितुं जगद्द्रुहा -
मुपाजिहीथा न महीतलं यदि।
समाहितैरप्यनिरूपितस्ततः
पदं दृशः स्याः कथमीश मादृशाम्।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| निजौजसा | - | स्वतेजसा |
| जगद्रुहां | - | लोकविनाशकारिणां कंसादीनां |
| उज्जासयितुं | - | संहारार्थं |
| महीतलं | - | भूमिं |
| यदि न उपाजिहीथाः | - | न अवतरेश्चेत् |
| ततः समाहितैः अपि | - | एकाग्रचित्तैरपि |
| अनिरुपितः (त्वं) | - | अप्राप्तः (त्वं) |
| हे ईश | - | है विष्णो |
| मादृशां | - | मत्सदृशानां मानवानां |
| दृशः पदं | - | दृष्टिगोचरं |
| कथं स्याः | - | कथं भवेः। |

**भावार्थः**

स्वकीयप्रभावेन लोकविनाशकारिणां कंसाद्यसुराणां नाशाय यदि त्वं भूमौ नावतरेः तर्हि एकाग्रचित्तैः योगिभिरपि अप्राप्तस्त्वं मत्सदृशानां केवलमनुष्याणां कथं दृष्टिगोचरं भवेः।

## ३८. सन्दर्भः

त्रैलोक्यकण्टकेभ्यः असुरेभ्यः संसारस्यास्य परित्राणने भगवानेव समर्थो भवतीति नारदस्योक्तिः।

**श्लोकः**

उपप्लुतं पातुमदो मदोद्धतै-
स्त्वमेव विश्वम्भर विश्वमीशिषे।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः।।

**अन्वयः अर्थस्च**

| | | |
|---|---|---|
| हे विश्वम्भर | - | विश्वनाथ |
| मदोद्धतैः | - | उन्मत्तैः असुरैः |

| | | |
|---|---|---|
| अदः विश्वं पातुं | - | इमं लोकं रक्षितुं |
| त्वमेव ईशिषे | - | भवानेव शक्तोऽसि |
| क्षपातमस्काण्डमलीमसं | - | रात्र्यन्धकारेण मलिनीकृतं |
| नभः क्षालयितुं | - | आकाशं शुद्धीकर्तुं |
| रवेः ऋते | - | सूर्यादृते |
| कः क्षमेत | - | कः समर्थो भवति |

**भावार्थः**

हे लोकनाथ! वरबलेन उन्मत्तैः असुरैः क्रियमाणात् लोकोपद्रवात् इमं संसारं रक्षितुं भवानेव समर्थोऽसि। अस्य दृष्टान्तमाह रात्र्यन्धकारेण मलिनीकृतं आकाशं शुद्धिकर्तुं सूर्यादृते कः समर्थो भवति? कोपिनेत्यर्थः।

श्लोकेऽस्मिन् प्रतिवस्तूपमालङ्कारः।

## ३९. सन्दर्भः

कृष्णेन कृतः कंसवधः पूर्वस्मिन् अवतारे कृतात् हिरण्याक्षादीनां वघात् श्रेष्ठतरो न भवति इति नारद कथयति।

**श्लोकः**

करोति कंसादिमहीभृतां वधा -
ज्जनो मृगाणामिव यत्तव स्तवम्।
हरे हिरण्याक्षेपुरःसरासुर-
द्विपद्विषः प्रत्युत सा तिरस्क्रिया।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनःमृगाणामिव | - | प्रजाः हरिणानामिव |
| कंसादिमहीभृतां वधात् | - | कंसादि भूपालानां निधनात् |
| तव स्तवं करोति | - | भवतां स्तुतिं करोति |
| (इति) यत् हे हरे सा | - | हे विष्णो सा स्तुति क्रिया |
| हिरण्याक्षपुरःसरासुरद्विपद्विषः | - | हिरण्याक्षप्रभृतीनां दानवगजानां शत्रोः |
| तव प्रत्युत | - | भवतां कृते अर्थान्तरेण |
| तिरस्क्रिपा (भवति) | - | अवमानो भवति |

**भावार्थः**

हे हरे, नृसिंहरूप, प्रजा हरिणानामिव कंसादिभूपालानां वधात् तव यां प्रशंसां करोति सा हिरण्याक्षप्रभृतीनां दानवगजानां हन्तुः तव कृते न्यूनगुणकथनं भवति अर्थात् गजवधविचक्षणस्य सिंहस्य हरिणवधे यां प्रशंसां करोति तद्वत् हिरण्याक्षादीनां हन्तुः तव कृते कंसादीनां वधः लघुकार्यमेव भवति।

## ४०. सन्दर्भः

एवमुपोद्घातकथनानन्तरं नारदः स्वकीयमागमनप्रयोजनं कृष्णस्य पुरतः स्थापयामास।

**श्लोकः**

प्रवृत्त एव स्वयमुज्झितश्रमः
क्रमेण पेष्टुं भुवनद्विषामसि।
तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः।।

**अन्वयः अर्थश्च**

(त्वं) उज्झितश्रमः (सन्) -श्रमं विना, अतिलाघवेन

| | | |
|---|---|---|
| क्रमेण | - | एकैकः सन् |
| भुवनद्विषां | - | लोकविनाशकाराणां असुराणां |
| पेष्टुं | - | सर्वनाशं कर्तुं |
| स्वयमेव प्रवृत्तः असि | - | स्वेच्छयैव कार्यरतोऽसि |
| तथापि मिथः | - | एकान्ते |
| त्वदाभाषणलोलुपं मनः | - | त्वया सह भाषणेच्छुः ममचित्तं |
| मां वाचालतया युनक्ति | - | मां सम्भाषणे प्रेरयति |

**भावार्थः**

नारदः कृष्णं कथयति यद् भवान् येन केनापि परिश्रमेण विना एकैकः सन् लोकविनाशकारिणां असुराणां उन्मूलनाशं कर्तुं स्वयमेव कार्यरतो भवति, तथापि अहं एकान्ते रहसि त्वया सह भाषणलोलुपत्वात् किञ्चिद्वक्तुमिच्छामि।

# ४१.सन्दर्भः

इन्द्रस्य सन्देशं श्रोतुं नारदः कृष्णं प्रार्थयते ।

**श्लोकः**

तदिन्द्रसन्दिष्टमुपेन्द्र यद्वचः
क्षणं मया विश्वजनीनमुच्यते।
समस्तकार्येषु गतेन धुर्यता-
महिद्विषस्तद् भवता निशम्यताम् ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| तत् हे उपेन्द्र | - | इन्द्रानुज |
| इन्द्रसन्दिष्टं | - | इन्द्रेण उदीरितः |
| विश्वजनीनं यद् वचः | - | जनहितकारकः यः सन्देशः |
| क्षणं मया उच्यते | - | सद्य एव मया कथ्यते |
| अहिद्विषः तत् (वचः) | - | वृत्रहन्तुः सा वाणी |
| समस्तकार्येषु | - | सर्वविषयेषु |
| धुर्यतां गतेन | - | वैचक्षण्यं प्राप्तेन |
| भवता निशम्यतां | - | भवता श्रूयताम् । |

**भावार्थः**

नारदः इन्द्रस्य सन्देशं कृष्णं श्रावयति, हे इन्द्रानुज, इन्द्रेण प्रेषितो जनहितकारको यः सन्देशः स मया झटित्येव कथ्यते। वृत्रासुरनिषूदनस्य सा वाणी सर्वविद्याविचक्षणेन भवता श्रूयताम् ।

श्लोकेऽस्मिन् काव्यलिङ्गमलङ्कारः ।

# ४२.सन्दर्भः

नारदेनोक्तः इन्द्रसन्देश अतिशक्तस्य हिरण्यकाशिपुः नामकस्य असुरस्य वृत्तान्तेन प्रारभ्यते।

**श्लोकः**

अभूदभूमिः प्रतिपक्षजन्मनां
भियां तनूजस्तपनद्युतिर्दितेः ।।
यमिन्द्रशब्दार्थनिसूदनं हरे-
र्हिरण्यपूर्वं कशिपुं प्रचक्षते ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| प्रतिपक्षजन्मनां भियां | - | शत्रुभ्यो जातानां भयानां |
| अभूमिः | - | अविषयः (निर्भीक इत्यर्थः) |
| तपनद्युतिः | - | सूर्यवदुज्वलः |
| दितेः तनूजः अभूत् | - | दितेः पुत्रः आसीत् |
| यं इन्द्रशब्दार्थनिषूदनं | - | इन्द्रसंज्ञावाचकः योर्थः तस्य निवारकं दैत्यं |
| हिरण्यपूर्वं कशिषुं | - | हिरण्यशब्दपूर्वकं कशिपुशब्दं, हिरण्य-काशिपुमित्यर्थः । |
| प्रचक्षते | - | नाम्ना प्रयुज्यते । |

**भावार्थः**

रिपुभयरहितः सूर्यवत् तीक्ष्णस्वभावयुक्तः एकः दैत्यः आसीत् । परमैश्वर्यलक्षणस्य इन्द्रशब्दार्थस्य निवारणकुशलं तं असुरं हिरण्यपूर्वं कशिपुं अथवा हिरण्यकशिपुं संज्ञात्वेन प्रयुङ्क्ते। आह्वयतीत्यर्थः ।

## ४३. सन्दर्भः

इदंप्रथमतया हिरण्यकशिपुः देवानां चित्ते भयं जनयामास ।

**श्लोकः**

स मत्सरेणासुर इत्युपेयुषा
चिराय नाम्नः प्रथमाभिधेयताम् ।
भयस्य पूर्वावतरस्तरस्विना
मनस्सु येन द्युसदां न्यधीयत ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| समत्सरेण | - | अन्यशुभद्वेषसहितेन |
| असुर इति नाम्नः | - | दानव इति संज्ञायाः |
| चिराय | - | चिरकालेन |
| प्रथमाभिधेयतां उपेयुषा | - | अन्वर्थतया मुख्यार्थतां गतेन |
| तरस्विना येन | - | बलवता हिरण्यकशिपुना |
| द्युसदां मनःसु | - | देवानां चित्तेषु |
| भयस्य पूर्वावतरः | - | भीतेः प्रथमप्रवेशः |
| न्यधीयत | - | कृतः । |

**भावार्थः**

अन्येषामभ्युन्नतिमसहमानेन असुर इति पदस्य चिरकालेन अन्वर्थतया मुख्यार्थतां प्राप्तेन बलशालिना हिरण्यकशिपुना देवानां चित्तेषु भीतेः प्रथमप्रवेशः कृतः। अर्थात् हिरण्यकशिपुरेव प्रथमतया देवानां मनसि भीतिं जनयामास।

## ४४. सन्दर्भः

अणिमाद्यष्टसिद्धयः चतुरान् देवान् त्यक्त्वा हिरण्यकशिपुं सेवयामास।

**श्लोकः**

दिशामधीशांश्चतुरो यतः सुरा-
नपास्यं तं रागहृताः सिषेविरे ।
अवापुरारभ्य ततश्चला इति
प्रवादमुच्चैरयशस्करं श्रियः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| श्रियः | - | अणिमाद्यष्टसिद्धयः |
| दिशां अधीशान् | - | दिक्पालकान् |
| चतुरः सुरान् | - | इन्द्रयमवरुणकुबेरान् |
| अपास्य | - | परित्यज्य |
| तं | - | हिरण्यकशिपुं |

| | | |
|---|---|---|
| रागहृताः | - | हठादाकृष्टाः सत्यः |
| यतः सिषेविरे | - | यदाप्रभृति सेवां चक्रुः |
| ततः आरभ्य | - | तदा प्रभृति |
| अयशस्करं | - | दुष्कीर्तिहेतुं |
| चला इति | - | अस्थिरा इति |
| उच्चैः प्रवादं अवापुः | - | अपकीर्तिं प्रापुः । |

**भावार्थः**

अणिमाद्यष्टसिद्धियुक्ताः श्रियः इन्द्रयमवरुणकुबेरान् दिक्पालकान् परित्यज्य हिरण्यकशिपोः पराक्रमे हठादाकृष्टाः सत्यः यदाप्रभृति तस्य सेवां अकुर्वन् तदा प्रभृति अपमानकरीं अस्थिरा इति अपकीर्तिं प्रापयामासुः। श्लोकेऽस्मिन् पर्यायोक्तमलङ्कारः।

## ४५. सन्दर्भः

हिरण्यकशिपुभीत्या देवाः स्वकीयसेनाबलं विविधरीत्या परिपोषं चक्रुः।

**श्लोकः**

पुराणि दुर्गाणि निशातमायुधं
बलानि शूराणि घनाश्च कञ्चुकाः।
स्वरूपशोभैकफलानि नाकिनां
गणैर्यमाशंक्य तदादि चक्रिरे ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| नाकिनां गणैः। | - | स्वर्गवासिसमूहैः देवैः |
| यं आशङ्क्य | - | हिरण्यकशिपोराक्रमणशङ्कया |
| तदादि | - | तदा प्रभृति |
| स्वरूपशोभैकफलानि | - | सौन्दर्यैकप्रयोजनानि |
| पुराणि | - | नगराणि |
| दुर्गाणि चक्रिरे | - | अगम्यानि कारयामास |
| आयुधं निशातं (चक्रे) | - | स्वड्गशरादीनि तीक्ष्णनि चक्रिरे |
| बलानि शूराणि चक्रिरे | - | सैन्यानि वीरपुरुषसंयुतानि कारयामासुः |
| कञ्चुकाः घनाः (चक्रिरे) | - | कवचान् सबलान् अकुर्वन् । |

**भावार्थः**

हिरण्यकशिपोराक्रमणशङ्कया देवाः युद्धाय सेनां सुसज्जां अकुर्वन् । ते सौन्दर्यैकप्रयोजनानि नगराणि कृच्छ्रप्रवेशसाध्यानि दुर्गाणि चक्रुः, खड्गशराद्यायुधानां तीक्ष्णतां वर्धयामासुः, सेनायां पराक्रमशालिनः पुरुषान् योजयामासुः, कवचानां काठिन्यमपि वर्धयामासुः।

## ४६. सन्दर्भः

सर्वे देवाः भयात् सर्वदा हिरण्यकशिपुमेव नमस्कारविषयं करोति।

**श्लोकः**

स सञ्चरिष्णुर्भुवनान्तरेषु यां
यदृच्छयाशिश्रियदाश्रयः श्रियः।
करोति तस्यै मकुटोपलस्खल-
त्करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| भुवनान्तरेषु सञ्चरिष्णुः | - | विभिन्नेषु लोकेषु सञ्चरणशीलं |
| श्रियः आश्रयः सः | - | सर्वैश्वर्यानां स्वामी हिरण्यकशिपुः |
| यदृच्छया | - | स्वेच्छया |
| यां दिशं अशिश्रियत् | - | यस्यां दिशायां अगमत् |
| मुकुटोपलस्खलत्करैः | - | शिरसि बद्धाञ्जलिभिः |
| त्रिदशैः | - | देवैः |
| त्रिसन्ध्यं | - | तिसृषु सन्ध्यासु |
| तस्यै दिशे | - | तस्यैएव आशायै |
| नमः करोति | - | नमस्कारः क्रियन्ते । |

**भावार्थः**

विभिन्नेषु लोकेषु सञ्चरणशीलः सर्वैश्वर्याणां अधीशः स हिरण्यकशिपुः स्वेच्छया यस्यां दिशायां सञ्चरति तामेव दिशामभिमुखीकृत्य देवाः शिरसि बद्धाञ्जलिर्भूत्वा भयेन प्रभातमध्याह्नप्रदोषेषु तिसृषु सन्ध्यासु तस्यैव नमस्कारं कुर्वन्ति। तस्य भयात् देवाः नित्यकर्म संध्यावन्दनमपि परित्यजन्ति।

## ४७. सन्दर्भः

ईदृशं हिरण्यकशिपुं नृसिहरूपः त्वं नखे निभिन्ध्य जघान।

**श्लोक**

सटाच्छटाभिन्न घनेन बिभ्रता।

नृसिंह सैंहीमतनुं तनुं त्वया ।

स मुग्धकान्तास्तनसङ्गभङ्गुरै-

रुरोविदारं प्रतिचस्करे नखैः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे नृसिंह | - | हे नृहरे। |
| अतनुं सैंहीं तनुं | - | बृहदाकारं सिंहशरीरं |
| बिभ्रता | - | धारणं कृतवता (अत एव) |
| सटाच्छटाभिन्नघनेन | - | केशसमूहभिन्नमेघेन |
| त्वया सः | - | भवता हिरण्यकशिपुः |
| मुग्धकान्तास्तनसङ्गभङ्गुरैः | - | नववधूस्तनसङ्गमेन कुटिलैः |
| नखैः | - | नखरैः |
| उरोविदारं प्रतिचस्करे | - | वक्षस्थलभेदनं विधत्तम् । |

**भावार्थः**

हे नृसिंहरूप! नरसिंहावतारे बृहदाकारं सिंहशरीरं धृतवता अतएव स्वकीय केशसमूहैः विदारितमेघेन त्वया स हिरण्यकशिपुः नववधूकुचकुम्भसङ्गमेन वक्राकारैः नखैः वक्षस्थलनिर्भेदनं विधत्तम्। त्रैलोक्यभीतिदायकं हिरण्यकशिपुमपि हन्तुं समर्थोऽसि त्वं इति तात्पर्यार्थः।

## ४८. सन्दर्भः

स एव हिरण्यकशिपुः दैवैस्सह योद्धुमिच्छन् पुनः रावणरूपेण भूमौ जनिमलभत।

**श्लोकः**

विनोदमिच्छन्नथ दर्पजन्मनो

रणेन कण्ड्वास्त्रिदशैः समं पुनः।

स रावणो नाम निकामभीषणं

बभूवरक्षः क्षतरक्षणं दिवः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अथ स पुनः | - | अनन्तरं हिरण्यकशिपुः भूयः |
| त्रिदशैः समं | - | देवैः साकं |
| रणेन | - | युद्धेन |
| दर्पजन्मनः कण्ड्वाः | - | अहङ्कारोद्भूतस्य भुजकण्डूतेः |
| विनोदमिच्छन् | - | क्रीडनं वाञ्छन् |
| दिवः क्षतरक्षणं | - | स्वर्गस्य नष्टनिवारणं |
| निकामभीषणं | - | अत्यधिकं भयजनकं |
| रावणो नाम रक्षः बभूव | - | रावण इत्याख्यो राक्षसः सञ्जातः |

**भावार्थः**

अनन्तरं स एव हिरण्यकशिपुः पुनः पुनः देवैस्सह योद्धुमिच्छन् युद्धेन स्वहस्तस्य कण्डूतिं या अहङ्कारेण जाता तां विनोदयितुमिच्छन् हिरण्यकशिपोरभावात् स्वर्गस्य यः क्षतो जातः तस्य रक्षणार्थं अतिभीषणो रावणो नाम राक्षसरूपेण जनिमलभत।

## ४९. सन्दर्भः

स रावणः भुवनत्रयस्य अधिकारं लब्धुं परमेश्वर प्रीणनार्थं स्वशिरांसि विच्छेद्य दातुं चिकीर्षुः भवति।

**श्लोकः**

प्रभुर्बभूषुर्भुवनत्रयस्य यः

शिरोऽतिरागाद्दशमंचिकिर्तिषुः ।

अतर्कयद्विघ्नमिवेष्टसाहसः

प्रसादमिच्छासदृशं पिनाकिनः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| य भुवनत्रयस्य प्रभुः | - | त्रैलोक्यस्य स्वामी |
| बभूषुः | - | भवितुमिच्छुः |
| अतिरागात् | - | अत्युत्साहात् |
| दशमं शिरः | - | दशमं उत्तमाङ्गं |
| चिकर्तिषुः | - | कर्तितुं (छेत्तुं) इच्छुः |
| इष्टसाहसः | - | साहसप्रियः |
| इच्छासदृशं | - | स्वेच्छानुरुपं |
| पिनाकिनः प्रसादं | - | शिवस्य वरं |
| विघ्नमिव अतर्कयत् | - | सान्तराय इति गणयामास |
| | | (स रावणो नाम रक्षो वभूव) |

**भावार्थः**

यः जगत्रयस्य अधिपतिः भवितुमिच्छुः तदर्थं अत्युत्साहात् स्वकीयं दशमं शिरः छेत्तुं इच्छुः साहसप्रियः स्वानुरुपं पिनाकपाणेः शङ्करस्य प्रितिं विघ्नमिव गणयामास स रावणो नाम राक्षस आसीत्।

## ५०. सन्दर्भः

शङ्करात् वरान् प्राप्य रावणः कैलासगिरिं उत्तोलयन् शिवं अतोषयत् ।

**श्लोकः**

समुक्षिपन्यः पृथिवीभृतां वरं

वरप्रदानस्य चकार शूलिनः ।

त्रसत्तुषाराद्रिसुतासंभ्रम-

स्वयंग्रहाश्लेषसुखेन निष्क्रियम् ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| यः पृथिवीभृतां वरं | - | यः पर्वतानां श्रेष्ठं |
| समुत्क्षिपन् | - | उत्तोलयन् |

| | | |
|---|---|---|
| शूलिनः वरप्रदानस्य | - | शिवस्य आशीर्वादस्य |
| त्रसत्तुषाराद्रिसुतासंभ्रमस्वयं-ग्रहाश्लेषसुखेन | - | चकितायाः हिमालयपुत्र्यः पार्वत्यः भयेन स्वयंकृतालिङ्गनसुखेन |
| निष्क्रयं चकार | - | प्रत्युपकारं अकरोत् |

**भावार्थः**

एकदा रावणः पर्वतेषु श्रेष्ठं कैलासपर्वतं स्वहस्तेन उत्तोलनमकरोत् । अनेन सन्तुष्टः शिव चन्द्रहासाख्यं खड्गं रावणाय प्रायच्छत्। कैलासस्य उत्तोलनावसरे भयचकिता हिमगिरिसुता सम्भ्रमेण स्वयं शिवं आलिलिङ्ग। अस्यालिङ्गनसुखस्य कारणभूतो रावण शिवेन प्रदत्तस्य वरस्य प्रत्युपकारं पार्वत्यः आलिङ्गनसुखप्रदानेन अकरोत् । अत्र सुखवरदानयोर्विनिमयात् परिवृत्तिरलङ्कारः।

## ५१. सन्दर्भः

स्वकीयपराक्रमेण सर्वदा रावणः स्वर्गवासिनः निरन्तरमपीडयत् ।

**श्लोकः**

पुरीमवस्कन्द लुनीहि नन्दनं
मुषाण रत्नानि हरामराङ्गनाः ।
निगृह्य चक्रे नमुचिद्विषा बली
य इत्थमस्वास्थ्यमहर्दिवं दिवः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| बली यः | | -अधिकबलशाली रावणः |
| नमुचिद्विषा विगृह्य | - | इन्द्रेण सह युद्धं कृत्वा |
| पुरीं अवस्कन्द | - | अमरावतीं अवरुरोध |
| रत्नानि मुषाण | - | अमूल्यानि श्रेष्ठवस्तूनि अचोरयत् |
| अमराङ्गनाः हर | - | देवस्त्रियः अपजहार |
| इत्थं अहर्दिवं | - | अनेन प्रकारेण प्रतिदिनं। |
| दिवः अस्वास्थ्यं चक्रे | - | स्वर्गस्य उपद्रवं चकार। |

**भावार्थः**

प्रचुरबलशाली रावणः इन्द्रेण सह युद्धं कृत्वा इन्द्रपुरीममरावतीं अवरुरोध, नन्दनोद्यानं छिन्नभिन्नं चकार अमूल्यानि रत्नादिनि अचोरयत्, अप्सरसः अपजहार एवं रीत्या प्रतिदिनं सर्वप्रकारेण स्वर्गवासिनां

उपद्रवं चकार।

समुच्चयालङ्कारः ।

## ५२. सन्दर्भः

रावणं प्रतिरोद्धुं अशक्तः इन्द्रः स्वप्राणरक्षार्थं पलायनं अकरोत्

**श्लोकः**

सलीलयातानि न भर्तुरभ्रमो
र्न चित्रमुच्चैश्रवसः पदक्रमम् ।
अनुद्रुतः संयति येन केवलं
वलस्य शत्रुः प्रशशंस शीघ्रताम् ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| संयति | - | युद्धे |
| येन अनुद्रुतः | - | रावणेन अनुधावितः |
| वलस्य शत्रुः | - | तन्नामकस्य असुरस्य रिपुः इन्द्रः |
| अभ्रमोः भर्तुः | - | ऐरावतस्य |
| सलीलयातानि | - | सभङ्गीकगमनानि |
| न प्रशशंस | - | प्रशंसां न चकार |
| उच्चैश्रवसः | - | दिव्याश्वस्य |
| चित्रपदक्रमं न | - | नानाविधं पदविन्यासं न (प्रशशंस) |
| केवलं शीघ्रतां | - | स्वशीघ्रगतिमेव प्रशशंस । |

**भावार्थः**

युद्धे रावणेन पराजितः इन्द्रः वलस्य शत्रुर्भूत्वापि रावणेन अनुधावितः अभ्रमोः पत्युः ऐरावतस्य सुन्दरगमनं न प्रशंसामकरोत्, उच्चैश्रवसः नानाविधं सुन्दरपदविन्यासमपि न प्राकीर्तयत्, किन्तु केवलं स्वधावनस्य शीघ्रतामेव प्रशशंस ।

अत्र पर्यायोक्तमलङ्कारः ।

## ५३. सन्दर्भः

रावणभयात् इन्द्रः अन्धकारावृतासु महामेरुपर्वतगुहासु बहूनि दिनानि व्यतीतवान् ।

**श्लोकः**

अशक्नुवन् सोढुमधीरलोचनः
सहस्ररश्मेरिव यस्य दर्शनम् ।
प्रविश्य हेमाद्रिगुहागृहान्तरं
निनाय बिभ्यद्दिवसानि कौशिकः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अधीरलोचनः कौशिकः | - | भयेन अस्थिरदृष्टिः इन्द्रः |
| सहस्ररश्मेः इव | - | सूर्यस्य इव |
| यस्य दर्शनं | - | रावणस्य दर्शनं |
| सीढुं अशक्नुवन् | - | दर्शनपथं गन्तुमशक्तः सन् |
| हेमाद्रिगुहागृहान्तरं | - | सुमेरुपर्वतगह्वरेषु । |
| प्रविश्य | - | गत्वा |
| बिभ्यत् दिवसानि निनाय | - | भयचकितः सन् दिवसनि व्यतीतवान् । |

**भावार्थः**

भयेन प्रकम्पितनेत्रयुक्तः स इन्द्रः तीक्ष्णरश्मेः सूर्यस्य इव रावणस्य दर्शनपथं गन्तुमशक्तो भूत्वा हेमवर्णयुक्तस्य सुमेरुपर्वतस्य अन्धकारावृतासु गुहासु बहुकालपर्यन्तं निवासं चकार ।

## ५४. सन्दर्भः

रावणस्य गलच्छेदने सुदर्शनचक्रमपि असमर्थमासीत् ।

**श्लोकः**

बृहच्छिलानिष्ठुरकण्ठघट्टनाद्-
विकीर्णलोलाग्निकणं सुरद्विषः ।
जगत्प्रभोरप्रसहिष्णु वैष्णवं
न चक्रमस्याक्रमताधिकन्धरम् ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| बृहच्छिलानिष्ठुरकण्ठघट्टनात् | - | महदाकारपाषाण इव कठोरगलाभिघातात् |
| विकीर्णलोलाग्निकणं | - | विक्षिप्ताग्निकणं |

| | | |
|---|---|---|
| अप्रसहिष्णु | - | सोढुं अशक्तं |
| वैष्णवं चक्रं | - | विष्णोः सुदर्शनचक्रं |
| जगत्प्रभोः | - | सकललोकैकस्वामिनः |
| अस्य सुरद्विषः | - | अस्य देवरिपोः रावणस्य |
| अधिकन्धरं न अक्रमत | - | कण्ठे न प्रावर्तत |

**भावार्थः**

अतिकठिनपाषाणशिलेव कठोरकण्ठसंघट्टनात् प्रस्फुरिताग्निस्फुलिंगं सोढुं अशक्तं विष्णोः सुदर्शनचक्रं सकललोकैकस्वामिनः अस्य देवशत्रोः रावणस्य कण्ठच्छेदने असमर्थमासीत् ।

## ५५. सन्दर्भः

रावणः कुबेरस्य मनसि भीतिं जनयित्वा तस्य सम्पूर्णं धनं पुष्पकविमानञ्चापाहरत् ।

**श्लोकः**

विभिन्नशङ्खः कलुषीभवन्मुहु-
र्मदेन दन्तीव मनुष्यधर्मणः ।
निरस्तगाम्भीर्यमपास्तपुष्पकं
प्रकम्पयामास न मानसं न सः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| सः मदेन | - | रावणः अहङ्कारेण, दर्पेण |
| दन्ती इव | - | मदगज इव |
| विभिन्नशङ्खः सन् | - | विघट्टितनिधिसमूहः संपदश्च सन् |
| कलुषीभवत् | - | भीतिं जनयन् |
| निरस्तगाम्भीर्यं | - | तिरस्कृतप्रभावं |
| अपास्तपुष्पकं | - | अपहृतपुष्पकविमानं |
| मनुष्यधर्मणः | - | मानवस्वभावयुक्तस्य कुबेरस्य |
| मानसं | - | मनः |
| मुहुः न प्रकम्पयामास इति न | - | पुनः पुनः न क्षोभयामास इति न |

**भावार्थः**

रावणो मदेन दुष्टवारण इव निधिसमूहं भित्वा कुबेरस्य मनसि भीतिं जनयन्, तस्य प्रभावं ध्वंसयन् पुष्पकविमानमपहरन् मनुष्यस्वभावयुक्तस्य तस्य मनः पुनः पुनः संक्षोभयामास ।

## ५६. सन्दर्भः

रावणस्य प्रभावस्य पुरतः वरुणपाशमपि निष्प्रयोजनमासीत् ।

**श्लोकः**

रणेषु तस्य प्रहिताः प्रचेतसा

सरोषहुङ्कारपराङ्मुखीकृताः ।

प्रहर्तुरेवोरगराजरज्जवो

जवेन कण्ठं सभयाः प्रपेदिरे ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| रणेषु | - | युद्धेषु |
| प्रचेतसा प्रहिताः | - | वरुणेन प्रयुक्ताः |
| उरगराजरज्जवः | - | महासर्परूपिणः पाशाः |
| तस्य | - | रावणस्य |
| सराषहुङ्कारपराङ्मुखीकृताः | - | कोपयुक्तेन हुं इति शासनास्वरेण व्यावर्तिताः |
| सभयाः (सत्यः) | - | भीतियुक्ताः भूत्वा |
| जवेन | - | वेगेन |
| प्रहर्तुः एव कण्ठं | - | प्रयोक्तुः वरुणस्य गलमेव |
| प्रपेदिरे | - | प्राप्ताः । |

**भावार्थः**

रावणेन सह योद्धुमागतेन वरुणेन प्रयुक्ताः महासर्परुपिणः पाशाः रावणस्य कोपयुक्तेन हुं इति शासनास्वरेण पलायनोन्मुखाः अत एव भयभीताः सत्यः वेगेन प्रहर्तुः वरुणस्य गलमेव प्रत्यागताः ।

श्लोकेऽस्मिन् विषमालङ्कारः ।

## ५७. सन्दर्भः

मृत्युदेवं यमं जित्वा रावणः यमवाहनस्य महिषस्य द्वे श्रृङ्गे निष्पाट्य धनुर्निर्मातुं उद्युक्तः।

**श्लोकः**

परेतभर्तुर्महिषोऽमुना धनु-

र्विधातुमुत्खातविषाणमण्डलः ।

हृतेऽपि भारे महतस्त्रपाभरा-

दुवाह दुःखेन भृशानतं शिरः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अमुना | - | रावणेन |
| धनुः विधातुं | - | चापं निर्मातुं |
| उत्खातविषाणमण्डलः | - | उत्पाटितश्रृङ्गवलयः |
| परेतभर्तुः महिषः | - | यमराजस्य वाहनं |
| भारे हृते अपि | - | विषाणस्य भारे निवर्तिते अपि |
| महतः त्रपाभारात् | - | अत्यधिकं लज्जालुः सन् |
| भृशानतं शिरः | - | अत्यधिकं नम्रं शीर्षं |
| दुख्रेन उवाह | - | विषमेण वहति स्म। |

**भावार्थः**

मृत्युदेवं यमं युद्धे जित्वा रावणः तद्वाहनस्य महिषस्य विषाणे निष्पाट्य चापमेकं निर्मातुं उद्युक्तः, एवं नष्टविषाणवलयः यमराजवाहनरूपो महिषः स्वकीयविषाणस्य भारे निवर्तिते अपि लज्जाभारेण नम्रशिरस्कः भूत्वा अत्यधिकविषमेण नतं शीर्षं वहति स्म। उत्प्रेक्षालङ्कारः ।

## ५८. सन्दर्भः

सूर्यः ग्रीष्मकालेऽपि लघुतीक्ष्णरश्मिर्भूत्वा रावणस्य वधूः अलञ्चकार।

**श्लोकः**

स्पृशन् सशङ्कः समये शुचावपि

स्थितः कराग्रैरसमग्रपातिभिः।

अघर्मघर्मोदकबिन्दुमौक्तिकै-

रलंचकारास्य वधूरहस्करः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अहस्करः | - | दिवाकरः |
| शुचौ समये स्थितः अपि | - | ग्रीष्मकाले स्थितः अपि |
| असमग्रपातिभिः कराग्रैः | - | पूर्णरूपेण अस्पृशद्भिः रश्मिभिः |
| सशङ्कः स्पृशन् | - | ससङ्कोचः स्पर्शनं कुर्वन् |
| अघर्मघर्मोदकबिन्दुमौक्तिकैः। | - | अनुष्णस्वेदबिन्दुरूपैः प्रवालैः |
| अस्यवधूः अलञ्चकार | - | रावणस्य प्रियतामानां मण्डनं चकारा |

**भावार्थः**

ग्रीष्मर्तौ सूर्यस्य रश्मयः प्रायेण अत्युष्णा भवन्ति। किन्तु रावणभयात् ग्रीष्मकालेऽपि सूर्यः स्वैरश्मिभिः पूर्णरूपेण स्पर्शनमकुर्वन् रावणभयात् ससङ्कोचं अनुष्णस्वेदबिन्दुरूपैः प्रवालैः तस्य प्रियतमानां मण्डनं करोति स्म।

अस्मिन् शलोके समासोक्तिरलङ्कारः।

## ५९. सन्दर्भः

पूर्णचन्द्रः सर्वदा रावणस्य मन्दिरसमीपमेव स्थित्वा तस्य नर्मसाचिव्यं अकरोत् ।

**श्लोकः**

कलासमग्रेण गृहानमुञ्चता

मनस्विनीरुत्कयितुं पटीयसा।

विलासिनस्तस्य वितन्वता रतिं

न नर्मसाचिव्यमकारि नेन्दुना ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| कलासमग्रेण | - | षोडशमः कलाभिः सम्पूर्णेन |
| गृहान् अमुञ्चता | - | सदा स्वक्षेत्रे एव तिष्ठता |

| | | |
|---|---|---|
| मनस्विनीः उत्कयितुं | - | प्रियतमाः सान्त्वयितुं |
| पटीयसा | - | विदग्धेन |
| रतिं वितन्वता | - | अमुरागं वर्धयता |
| इन्दुना | - | चन्द्रेण |
| विलासिनः तस्य | - | सुखलोलुपस्य रावणस्य |
| नर्मसाचिव्यं | - | क्रीडाप्रेरकत्वं विदूषकत्वं वा |
| न अकारि इति न | - | अकरोत् |

**भावार्थः**

स्वकीयाभिः षोडशाभिः कलाभिः पूर्णरूपेण प्रकाशयन्, सर्वदा स्वक्षेत्रे एव तिष्ठन्, स्त्रीणां प्रीणने विदग्धः अनुरागसंवर्धकः चन्द्रः सर्वदा सुखलोलुपस्य रावणस्य नर्मसचिवरूपेण अथवा विदूषकरूपेण वर्तमानो भवति। अर्थात् चन्द्रः रावणभयात् स्वकीयसङ्क्रमणं परित्यज्य सर्वदा रावणस्यैव सेवामकरोत्।

## ६०. सन्दर्भः

रावणः स्वप्रियतमानां कर्णाभरणनिर्माणार्थं विघ्नेश्वरस्य दन्तमेकमुद्धृतवान् ।

**श्लोकः**

विदग्धलीलोचितदन्तपत्रिका-
विधित्सया नूनमनेन मानिना ।
न जातु वैनायकमेकमुद्धृतं
विषाणमद्यापि पुनः प्ररोहति ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| मानिना अनेन | - | दर्पशालिना रावणेन |
| विदग्धलीलोचितदन्तपत्रिकाविधित्सया | - | चतुराणां विलासिनीनां अनुयोज्यानि कर्णभूषणानि निर्मातुमिच्छया |
| नूनं जातु | - | अवश्यं कदाचित् |
| उद्धृतं | - | आकृष्टं |
| वैनायकं एकं विषाणं | - | गणेशस्य एको दन्तः |
| अद्यापि | - | अस्मिन् कालेऽपि |
| पुनः न प्ररोहति | - | पुनः न प्रादुर्भवति । |

**भावार्थः**

दर्पशालिना रावणेन भोगविलासचतुराणां स्वप्रियतमानां अनुयोज्यानि कर्णभूषणानि निर्मातुमिच्छया नूनं कदाचित् उत्पाटितो गणेशदन्तः अधुनापि पुनर्न प्रादुर्भवति। प्रायः विनष्टाः दन्ताः बाल्यकाले पुनः प्रादुर्भवति किन्तु रावणेनोत्पाटितो गणेशदन्तः न प्रादुर्बभूवेत्यनेन रावणस्य करबलभेव व्यज्यते ।

## ६१. सन्दर्भः

रावणस्य कामकेलिषु साहास्यं कुर्वन् वायु तस्य प्रीतिपात्रं बभूव ।

श्लोकः

निशान्तनारीपरिधानधूनन-
स्फुटागसाप्यूरुषु लोलचक्षुषः ।
प्रियेण तस्यानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| निशान्तनारीपरिधानधूननस्फुटागसा अपि | - | अन्तःपुरस्त्रीणां अधोवसनस्य सञ्चालनेन व्यक्तापराधोऽपि |
| ऊरुषु | - | सक्थिषु |
| लोलचक्षुषः | - | सतृष्णदृष्टेः |
| (अत एव) तस्य प्रियेण | - | रावणस्य प्रीतिभाजनेन |
| प्रकम्पनेन | - | वायुना |
| अनपराधबाधिताः | - | विनाप्यपराधेन पीडिताः |
| सुराः | - | देवाः |
| अनुचकम्पिरे | - | अनुकम्पायाः पात्रीभूता जाताः । |

**भावार्थः**

वायोः तीव्रसञ्चलनेन अन्तःपुरस्त्रीणां अधोवसनस्य स्थानभ्रंशो जायते। अनेन दृश्यमानेषु तासामूरुषु सरागदृष्टिः भवति रावणः। अत एव रावणस्य प्रीतिपात्रं भवति वायुः। अनेन वायुना अपराधमकुर्वाणाः तथापि रावणभृत्यैः पीडिता देवाः अनुकम्पायाः विषया जायन्ते । अर्थात् वायोः अनया क्रियया सन्तुष्टो रावणः देवान् स्वदण्डनात् मुमोच ।

# ६२. सन्दर्भः

अग्निरपि रावणस्य पुरतः निस्तेजो जायते।

**श्लोकः**

तिरस्कृतस्तस्य जनाभिभाविना
मुहुर्महिम्ना महसां महीयसाम्।
बभार बाष्पैर्द्विगुणीकृतं तनु-
स्तनूनपाद्धूमवितानमाधिजैः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| तस्य | - | रावणस्य |
| जनाभिभाविना | - | लोकतिरस्कारिणा |
| महीयसां महसां महिम्ना | - | अतिमहतां तेजसां प्रभावेण |
| मुहुः तिरस्कृतः | - | पुनरपि न्यूनीकृतः |
| (अत एव) तनुः | - | कृशरूपः |
| तनूनपात् | - | अग्निः |
| आधिजैः बाष्पैः | - | दुखोद्भूतैः अश्रुकणैः |
| द्विगुणीकृतं | - | द्विरावृत्तं |
| धूमवितानं बभार | - | धूममण्डलं उवाह । |

**भावार्थः**

रावणस्य लोकतिरस्कारिणा अत्यधिकं वर्धमानानां तेजसां प्रभावेण पुनरपि दुर्बलीकृतः कृशरूपः अग्निः स्वदुर्बलत्वात् जातेन दुःखेन जातैः अश्रुकणैः द्विगुणीकृतं धूममण्डलं धारयामास, अर्थात् रावणभीत्या अग्निः तस्य पुरतः ज्वलितुं न समर्थो भवति।

अस्मिन् श्लोके अतिशयोक्तिरलङ्कारः ।

# ६३. सन्दर्भः

रावणभीत्या उग्रविषशालिनः सर्पा अपि आचारेण व्यवहारेण च विनयशीला अभवन् ।

**श्लोकः**

परस्य मर्माविधमुझ्झतां निजं

द्विजिह्वतादोषमजिह्मगामिभिः ।

तमिद्धमाराधयितुं सकर्णकैः

कुलैर्न भेजे फणिनां भुजङ्गता ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| इद्धं तं आराधयितुं | - | उग्रप्रतापशालिनं रावणं सेवितुं |
| परस्य मर्माविधं | - | शत्रोः जीवस्थाननाशकं |
| निजं द्विजिह्वतादोषं | - | स्वकीयं मारकविषत्वादि दोषं |
| उज्झतां फणिनां | - | त्यजतां सर्पाणां |
| अजिह्मगामिभिः | - | अवक्रगामिभिः, ऋजुगतिभिः |
| सकर्णकैः कुलैः | - | आविष्कृतश्रोत्रैः समूहैः |
| भुजङ्गता | - | सर्पता |
| न भेजे | - | न तत्याज |

**भावार्थः**

उग्रप्रतापशालिनं तं रावणं सेवितुं शत्रोः मर्मभेदकं स्वकीयं मारकविषत्वादिदोषं त्यजतां ऋजुगतिभिः रावणाज्ञां श्रोतुं सज्जीकृतश्रोत्रैः सर्पाणां समूहैः सर्पत्वं न तत्याज। अर्थात् उग्रविषशालिनः सर्पा अपि रावणं सेवितुं विवशा जाताः इत्यर्थः ।

आस्मिन् श्लोके समासोक्तिरलङ्कारः ।

# ६४. सन्दर्भः

रावणस्य युद्धगजैः अष्टासु दिक्षु स्थिता दिग्गजाः विद्राविताः पुनः स्वस्थानं न प्राप्ताः ।

**श्लोकः**

तदीयमातङ्गघटाविघट्टितैः

कटस्थलप्रोषितदानवारिभिः।

गृहीतदिक्कैरपुनर्निवर्तिभि-

श्चिराय याथार्थ्यमलम्भि दिग्गजैः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| तदीयमातङ्गघटाविघट्टितैः | - | रावणस्य गजसमूहेन आक्रान्तैः। |
| कटस्थलप्रोषितदानवारिभिः | - | मस्तकान्निर्गलितमदजलैः |
| गृहीतदिक्कैः | - | पलायनं कृत्वा आश्रितदिशाभिः |
| अपुनर्निवर्तिभिः | - | पुनः अप्रत्यागतैः |
| दिग्गजैः | - | दिग्दन्तिभिः |
| चिराय | - | बहुकालपर्यन्तं |
| याथार्थ्यं | - | स्वनाम्नः सार्थक्यं |
| अलम्भि | - | सम्प्राप्तम् । |

भावार्थः

रावणस्य युद्धगजसमूहे आक्रमणं कुर्वद्भिः तेनैवाक्रमणेन निर्भिन्नमस्तकान्निर्गलितमदजलैः रावणभयेन पलायनं कृत्वा दिशासु आश्रयं स्वीकुर्वद्भिः पुनर्न प्रत्यागतैः दिग्दन्तिभिः यासु दिशासु गताः तास्वेव स्थीयमानत्वात् दिग्गज इति स्वनाम सार्थकं अक्रियन्त।

## ६५. सन्दर्भः

इन्द्रलोकवासिनः बह्व्यः अप्सराः रावणेनापहृताः ।

**श्लोकः**

अभीक्ष्णमुष्णैरपि तस्य सोष्मणः

सुरेन्द्रबन्दीश्वसितानिलैर्यथा ।।

सचन्दनाम्भःकणकोमलैस्तथा

वपुर्जलार्द्रापवनैर्न निर्ववौ ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| सोष्मणः तस्य वपुः | - | कामज्वरयुक्तस्य रावणस्य शरीरः |
| अभीक्ष्णं उष्णैः अपि | - | अत्यधिकं तापयुक्तैः अपि। |

| | | |
|---|---|---|
| सुरेन्द्रबन्दीश्वसितानिलैः | - | रावणबन्धने क्षिप्तानां नारीणां उच्छ्वासवायुभिः |
| यथा निर्ववौ | - | येनप्रकारेण शमयाम्वभूव |
| तथा | - | तेन प्रकारेण |
| सचन्दनाम्भःकणकोमलैः | - | चन्दनोदकबिन्दुना मृदुलैः |
| जलार्द्रपवनैः | - | शीतीकृतवायुभिः |
| न (निर्ववौ) | - | न शमयाम्बभूव । |

**भावार्थः**

कामाज्वरयुक्तस्य रावणस्य शरीरोष्मा अत्यधिकतापयुक्तैरपि रावणबन्धने क्षिप्तानां देवस्त्रीणां उच्छ्वासवायुभिः यथा शमयाम्बभूव तथा चन्दनमिश्रितजलकणेन मृदुलैः शीतीकृतवायुभिः न शमयाम्बभूव। रावणस्य कामपूरणे देवस्त्रियः विवशा जाताः इत्यर्थः ।

अस्मिन् श्लोके विषमालङ्कारः ।

## ६६. सन्दर्भः

तत्तदृतुषु उत्पत्स्यमानैः कुसुमराजिभिः षट् ऋतवः रावणस्य सेवां चक्रुः।

**श्लोकः**

तपेन वर्षाः शरदा हिमागमो
वसन्तलक्ष्म्या शिशिरः समेत्य च ।
प्रसूनक्लृप्तिं दधतः सदर्तवः
पुरोऽस्य वास्तव्यकुटुम्बितां ययुः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| सदा प्रसूनक्लृप्तिं दधता | - | सर्वदा पुष्पसमृद्धिं धारयतः |
| ऋतवः | - | ग्रीष्मादयः |
| वर्षाः तापेन | - | वर्षर्तुः ग्रीष्मेण |
| हिमागमः शरदा | - | हेमन्तर्तुः शरदृतुना |
| शिशिरः वसन्तलक्ष्म्या | - | शिशिरर्तुः वसन्तशोभया च |
| समेत्य | - | मिलित्वा |
| अस्य पुरे | - | रावणस्य गृहे |

| | | |
|---|---|---|
| वास्तव्यकुटुम्बितां | - | नित्यसहवासित्वं |
| ययुः | - | प्रापुः । |

**भावार्थः**

ऋतवः स्वकीयं नैसर्गिकस्वभावं विहाय सर्वदा पुष्पसमृद्धिं धारयन् वर्षः ग्रीष्मेण हेमन्तः शरदा शिशिरः वसन्तेन च मिलित्वा रावणस्य गृहे उपवने च अहोरात्रं निवासं चक्रुः।

असम्बन्धे सम्बन्धरूपातिशयोक्तिरत्र अलङ्कारः ।

## ६७. सन्दर्भः

आसन्नविनाशः स त्वया भाविनं स्वमृत्युं जानन्नपि सीतामपहृत्य त्वयैव मृत्युपथं जगाम ।

**श्लोकः**

अमानवं जातमजं कुले मनोः
प्रभावितं भाविनमन्तमात्मनः।
मुमोच जानन्नपि जानकीं न यः
सदाभिमानैकधना हि मानिनः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अमानवं अजं | - | अमानुषं अनुत्पन्नं |
| मनोः कुले जातं | - | मनुवंशे उद्भूतं |
| प्रभाविनं | - | प्रतापिनं (भवन्तं) |
| आत्मनः अन्तं भाविनं | - | स्वीयान्तं, भविष्यन्तं, हन्तारमित्यर्थं |
| जानन् अपि | - | अवगमन् अपि |
| यः जानकीं न मुमोच | - | यः सीतां न तत्याज |
| हि मानिनः सदा | - | प्रभावशालिनः सर्वदा |
| अभिमानैकधना भवन्ति | - | स्वात्माभिमानमेव धनं मन्यमाना भवन्ति |

**भावार्थः**

अमानुषं अनादिं मनुवंशे उद्भूतं प्रतापशालिनं भवन्तं भविष्यमाणस्य स्वमरणस्य कारकं अवगमन्नपि स रावणः रामपत्नीं सीतामपहर्तुं इयेष, यतो हि अभिमानशीलाः सर्वदा स्वात्माभिमानमेव उत्तमं धनं

मन्यमाना भवन्ति।

अस्मिन् श्लोके अर्थान्तरन्यासालङ्कारः ।

# ६८. सन्दर्भः

भवान् दाशरथिर्भूत्वा लङ्कां गत्वा रावणं जघान इति विषयं स्मारयति नारदः ।

**श्लोकः**

स्मरत्यदो दाशरथिर्भवन्भवा-
नमुं वनान्ताद्वनितापहारिणम् ।
पयोधिमाबद्धचलज्जलाविलं
विलङ्घ्य लङ्कां निकषा हनिष्यति ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| भवान् दाशरथिः भवन् | - | भवान् रामचन्द्रो भूत्वा |
| वनान्तात् | - | दण्डकारण्यात् |
| वनितापहारिणं अमुं | - | सीतापहरणकारकं रावणं |
| आबद्धचलज्जलाविलं | - | सेतुबन्धनेन मृण्मयजलयुक्तं |
| पयोधिं | - | समुद्रं |
| विलङ्घ्य | - | तरणं कृत्वा |
| हनिष्यति | - | अवधीत् (अभिज्ञावचने लृट्) |
| अदः स्मरति | - | इमं विषयं स्मरति वा न वा |

**भावार्थः**

रामेण कृतं रावणवधं नारदः कृष्णं स्मारयति । भवान् रामचन्द्रो भूत्वा दण्डकारण्यात् सीतापहरणकारकं अमुं रावणं पर्वतसमूहान् प्रक्षिप्य निर्मितेन सेतुना पङ्किलं समुद्रं उल्लङ्घ्य लङ्कासमीपं अवधीत् ।

# ६९. सन्दर्भः

स एव रावणः अधुना शिशुपालरूपेण पुनः जनिमलभत ।

**श्लोकः**

अथोपपत्तिं छलनापरोऽपरा
मवाप्य शैलूष इवैष भूमिकाम् ।
तिरोहितात्मा शिशुपालसंज्ञया
प्रतीयते सम्प्रति साप्यसः परैः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अथ सम्प्रति | - | राक्षसदेहत्यागानन्तरं अधुना |
| छलनापरः एष | - | कपटतन्त्रशाली रावणः |
| शैलूषः भूमिकां इव | - | नटः रूपान्तरमिव |
| अपरां उपपत्तिं अवाप्य | - | जन्मान्तरं प्राप्य |
| शिशुपालसंज्ञया | - | शिशुपाल इति नाम्ना |
| तिरोहितात्मा सन् | - | अप्रत्यक्षमूर्तिः भूत्वा |
| सः अपि | - | स रावणः अपि |
| परैः | - | अन्यैः |
| असः प्रतीयते | - | रूपान्तरेण ज्ञायते । |

**भावार्थः**

राक्षसदेहत्यागानन्तरं अधुना कपटतन्त्रशाली स रावणः यथा नाटकादिषु नटः रूपान्तरं स्वीकरोति तथा जन्मान्तरं सम्प्राप्य शिशुपाल इति नाम्ना अप्रत्यक्षमूर्तिर्भूत्वा स एव रावणः इतरैर्जनैः रूपान्तरेण शिशुपालरूपेण गोचरीक्रियते।

## ७०. सन्दर्भः

स एष शिशुपालः बाल्यादेव अतिशक्तिशालिरासीत् ।

**श्लोकः**

स बालआसीद्वपुषा चतुर्भुजो
मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।

युवा कराक्रान्तमहीभृदुच्चकै-
रसंशयं सम्प्रति तेजसा रविः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| सः बालः (सन्) | | -शिशुपालः बाल्यावस्थायामपि |
| चतुर्भुज आसीत् | - | भुजचतुष्टयवानासीत् |
| मुखेन पूर्णेन्दुनिभः | - | पूर्णचन्द्रसमानमुखकान्तियुतः |
| त्रिलोचन आसीत् | - | नेत्रत्रययुक्त आसीत् |
| सम्प्रति (तु) युवा | - | अधुना तु यौवनयुक्तः सन् |
| कराक्रान्तमहीभृत् | - | इतरेभ्यो राजभ्य करस्वीकर्ता |
| उच्चकैः तेजसा | - | अत्यधिकप्रभावेन |
| रविः (अस्ति) असंशयम् | - | सूर्य एवेति निश्चयः । |

**भावार्थः**

स शिशुपालः बाल्यावस्थायां भुजचतुष्टयेन विष्णुचैतन्ययुत आसीत् । एवञ्च पूर्णचन्द्रवदनः त्रिलोचन आसीत् अनेन शैवचैतन्यमपि शिशुपाले अन्तर्भूत आसीत् अधुना यौवनावसरे चतुर्भुजं त्रिलोचनञ्च अप्रत्यक्षमभूत् । यौवनयुक्तः सन् शिशुपालः इतरेभ्यो राजभ्यः करं स्वीकृत्य तेषामुपरि स्वकीयमाधिपत्यं स्थापयामास। अत्यधिकप्रभावेन स सूर्यसमान आसीदिति नूनम् ।

## ७१. सन्दर्भः

नैसर्गिकशक्तिशाली शिशुपालः वरलाभेन वीर्ययुतान् हिरण्यकशिपुरावणादीन् परिहसति।

**श्लोकः**

स्वयं विधाता सुरदैत्यरक्षसा-
मनुग्रहावग्रहयोर्यदृच्छया ।
दशाननादीनभिराद्धदेवता-
वितीर्णवीर्यातिशयान् हसत्यसौ ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| यदृच्छया स्वयं | - | स्वेच्छयैव न तु वरलाभेन स्वयं |
| सुरदैत्यरक्षसां | - | देवदानवराक्षसानां |

| | | |
|---|---|---|
| अनुग्रहावग्रहयोः | - | आशीर्वादसंहारयोः |
| विधाता असौ | - | कर्ता शिशुपालः |
| अभिराद्धदेवतावितीर्णवीर्यातिशयान् | - | सेवितदेवैः प्रदत्तबलप्रभावान् |
| दशाननादीन् हसति | - | रावणादीन् परिहसति। |

**भावार्थः**

नैसर्गिकेन न तु वरलाभेन देवदानवराक्षसानां रक्षणनिग्रहसमर्थः अयं शिशुपालः ब्रह्मादिदेवेभ्यो लब्धेन वरप्रसादेन वर्धितवीर्ययुतान् हिरण्यकशिपुरावणादीन् परिहसति। सः तान् याचकानिव पश्यति।

## ७२. सन्दर्भः

पूर्वजन्मस्वभाव इवास्मिन् जन्मन्यपि शिशुपालः लोकोपद्रवकारको भवतीति नारदाः कथयति।

**श्लोकः**

बलावलेपादधुनापि पूर्वव-
त्प्रबाध्यते तेन जगज्जिगीषुणा।
सतीव योषित्प्रकृतिः सुनिश्चला
पुमांसम्भ्येति भवान्तरेष्वपि ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जिगीषुणा तेन | - | विजयकांक्षिणा शिशुपालेन |
| बलावलेपात् | - | स्वभुजबलदर्पात् |
| अधुना अपि | - | अस्मिन् जन्मन्यपि |
| पूर्ववत् | - | पूर्वजन्मवत् |
| जगत् प्रबाध्यते | - | लोकः दुःखमनुभूयते |
| सुनिश्चला प्रकृतिः | - | स्थिरस्वभावयुक्ता |
| सती योषित् इव | - | पतिव्रता नारी इव |
| भवान्तरेषु अपि | - | जन्मान्तरेषु अपि |
| पुमांसं अभ्येति | - | पतिमाप्नोति । |

**भावार्थः**

त्रैलोक्यविजयकांक्षी स शिशुपालः पूर्वजन्मवत् अस्मिन् जन्मन्यपि पृथिवीं पीडयति। अतिस्थिरस्वभावयुक्ता पतिव्रता नारी जन्मान्तरेष्वपि तमेव भर्तारं प्राप्नोति यः पूर्वजन्मनि तस्याः पतिरासीत् ।

श्लोकेस्मिन् अर्थान्तरन्यासालङ्कारः ।

## ७३. सन्दर्भः

अतः तस्य निग्रहो भवता करणीय इति नारद कथयति।

**श्लोकः**

तदेनमुल्लङ्घितशासनं विधे-

र्विधेहि कीनाशनिकेतनातिथिम्।

शुभेतराचारविपक्त्रिमापदो

निपातनीया हि सतामसाधवः ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| तत् विधेः उल्लङ्घितशासनं | - | तस्मात् विधातुः आज्ञानिरासकं |
| एनं | - | शिशुपालं |
| कीनाशनिकेतनातिथिं | - | यमनिलये अतिथिं |
| विधेहि | - | कुरु, यमगृहं प्रेषयेत्यर्थः |
| (तथा) हि शुभेतराचारविपक्त्रिमापदः | - | दुराचारेण नाशवस्थां सम्प्राप्ताः विपत्तयः |
| असाधवः | - | दुर्जनाः |
| सतां | - | भवादृशानां |
| निपातनीयाः | - | वध्याः । |

**भावार्थः**

तस्मात् लोकनियमानतिक्रामन्तं दर्पभूयिष्ठं तं शिशुपालं यमालये अतिथिं कुरु, तस्य संहारः करणीय इत्यर्थः । यतो हि स्वकीयदुष्कर्मणा नाशोन्मुखत्वं गता लोककण्टकरूपाः दुर्जनाः भवादृशानां लोकरक्षकानां वध्या भवति ।

श्लोकेऽस्मिन् अर्थान्तरन्यासालङ्कारः ।

## ७४. सन्दर्भः

शिशुपालस्य वधं कृत्वा इन्द्रं प्रसादयितुं नारदः कृष्णं प्रार्थयते

**श्लोकः**

हृदयमरिवधोदयादुदूढ-

द्रढिम दधातु पुनः पुरन्दरस्य ।

घनपुलकपुलोमजाकुचाग्र-

द्रुतपरिरम्भनिपीडनक्षमत्वम् ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अरिवधोदयात् | - | शत्रुनाशलाभात् |
| उदूढद्रढिम | - | निर्भयत्वाद् धृतधैर्य |
| पुरन्दरस्य हृदयं | - | इन्द्रस्य मनः |
| धनपुलकपुलोमजाकुचाग्रद्रुतपरिरम्भनि-<br>पीडनक्षमत्वं | - | वर्धितरोमाञ्चयोः इन्द्राण्यः कुचकुम्भयोः<br>शीघ्रालिङ्गनस्य तयोः परिपीडनस्य सामर्थ्यं |
| दधातु | - | प्राप्नोतु । |

**भावार्थः**

यदि भवान् शिशुपालं हनिष्यति तदा शत्रुनाशलाभात् भयरहितं धृतधैर्यं च इन्द्रस्य मानसं अत्यधिकं पुलकितयोः पुलोमसुतायाः इन्द्राण्यः कुचकुम्भयोः झटित्यालिङ्गनस्य तयोर्मर्दनस्य च सामर्थ्यं प्राप्नोतु अत्र अतिशयोक्तिः वृत्यनुप्रासश्च अलङ्कारौ । छन्दः पुष्पिताग्रा - तस्य लक्षणं - 'अयुजिनयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति।

## ७५. सन्दर्भः

नारदस्य प्रार्थनां स्वीकृत्य कृष्णः शिशुपालं प्रति स्वक्रोधं भ्रुकुटिक्षेपेण प्रकाशयति।

**श्लोकः**

ओमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभ-

स्तस्मिन्नुत्पतिते पुरः सुरमुनाविन्दोः श्रियं बिभ्रति ।

शत्रूणामनिशं विनाशपिशुनः क्रुद्धस्य चैद्यं प्रति

व्योम्नीव भ्रकुटिच्छलेन वदने केतुश्चकारास्पदम् ।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| तस्मिन् सुरमुनौ | - | नारदे |
| इतिवाचं व्याहृत्य | - | एवं उक्त्वा |
| नभः उत्पतिते | - | गगनमुद्गमिते |
| पुरः इन्दोः श्रियं बिभ्रति | - | अग्रे चन्द्रप्रभां धारयति |
| अथ ओं इत्युक्तवतः | - | अनन्तरं ओं इति कथयतः |
| चैद्यं प्रति क्रुद्धस्य | - | चोदिराजं प्रति कुपितस्य |
| शार्ङ्गिणः वदने | - | कृष्णस्य आनने |
| व्योम्नि इव | - | आकाशे इव |
| अनिशं | - | सर्वदा |
| शत्रूणां विनाशपिशुनः | - | रिपूणां नाशसूचकः |
| केतुः | - | धूमकेतुः |
| भृकुटिच्छलेन | - | भ्रूभङ्गभावेन |
| आस्पदं चकार | - | स्थितिं चकार |

**भावार्थः**

तदनन्तरं एतादृशानि वचनान्युक्त्वा तस्मिन् नारदे आकाशमुद्गमिते अग्रे चन्द्रप्रभां प्रकाशयाति सति नारदस्य वचनं ओमित्युक्त्वा स्वीकृतवतः, चेदिराजं शिशुपालं प्रति कुपितस्य शाङ्र्गधारिणः कृष्णस्य वदने यथा आकाशे शत्रुविनाशसूचको धूमकेतुः भ्रूभङ्गभावेन प्रत्यक्षीबभूव ।

अस्मिन् श्लोके सङ्करालङ्कारः ।

शार्दूलविक्रीडितं छन्दः- तल्लक्षणं- 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितं" इति ।

इति माधप्रणीतस्य शिशुपालवधस्य

प्रथमः सर्गः ।

---

# अलङ्काराः

## १. रूपकम्

लक्षणम्

विषय्यभेदताद्रूप्य रञ्जनं विषयस्य यत् ।

रूपकं तत्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ।।

**व्याख्या**

विषयी-उपमानभूतं पद्मादि। विषयः- उपमेयभूतं मुखादि। विषयिणो रूपेण विषयस्य अभेदताद्रूप्याभ्यां रञ्जनं स्वोपरक्तबुद्धिविषयीकरणं रूपकम्। द्विविधं रूपकं, अभेदरूपकं, ताद्रूप्यरूपकञ्चेति। तद्द्विविधमपि विषय्यपेक्षया - विषयस्याधिक्योक्त्या, न्यूनत्वोक्त्या, अनुभयोक्त्या च त्रिविधम् । एवं षड्विधं रूपकम् - तच्च

| | | |
|---|---|---|
| १. अनुभयभेदरूपकम्, | २. न्यूनाभेदरूपकम् | ३. अधिकाभेदरूपकम् |
| ४. अनुभयताद्रूप्यरूपकम् | ५. न्यूनताद्रूप्यरूपकम् | ६. अधिकताद्रूप्यरूपकम् । |

**१. अनुभयाभेदरूपकम् - उदाहरणम् ।**

"अयं हि धूर्जटिः साक्षाद्येन दग्धा पुरः क्षणात्"।

अयं पूरोवर्ती राजा साक्षात् धूर्जटिः शिवः येन पुरः शत्रुनगराणि क्षणात् दग्धाः इत्यनुभयाभेदरूपकस्योदाहरणम्। अत्र पुरदाहकत्वसाम्यादयं साक्षात् शम्भुरेवेत्यभेदः प्रतीयते। विषयस्य न्यूनताधिक्ययोश्चानुक्तेर्लक्षणसमन्वयः ।

**२. न्यूनाभेदरूपकम् - उदाहरणम् -**

"अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम्"।

तृतीयमेव तार्तीयीकं विलोचनं नेत्रं विना शम्भुरयमास्ते, शम्भुरेवायं पुरोवर्ती राजा, इति न्यूनाभेदरूपकोदाहरणम्। अत्र वर्ण्यस्य राज्ञः शिवाभेदप्रतिपादनेऽपि तृतीयलोचनराहित्यरूपं न्यूनत्वमुक्तमिति लक्षणसमन्वयः ।

### ३. अधिकाभेदरूपकम् - उदाहरणम् ।

"शम्भुविश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्"।

शम्भुरयमद्य समदृष्टितां समसङ्ख्यलोचनतां (एकरुपदर्शनतां च अवलम्ब्य विश्वमवति रक्षतीति अधिकाभेदरूपकस्योदाहरणम्। अत्रायं राजा शम्भुरेवेत्यभेदे प्रतिपादिते पूर्वावस्थायां विषमदृष्टिरिदानीं पुनः समदृष्टिरित्याधिक्यं विषयस्य प्रतिपादितमिति लक्षणसमन्वयः।

### ४. अनुभयताद्रूप्यरूपकम् - उदाहरणम् ।

"अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना"।

अस्यास्तन्व्याः मुखमेवेन्दुः मुखेन्दुः तेन नेत्रयोरानन्दे लब्धे सति इन्दुना चन्द्रेण किम्? न किमपि प्रयोजनं, मुखेनैव चन्द्रकार्यस्य नेत्रानन्दस्य करणादित्यर्थः। अत्र मुखचन्द्रयोर्भेदे प्रतीयमानेऽपि 'मुखेन्दुना' इति मुखे चन्द्रत्वारोपः नेत्रानन्दकरत्वरुपतदीयधर्मारोपमात्रे पर्यवसति न्यूनताधिक्ययोरनुक्त्या च अनुभयताद्रूप्यरुपकम् ।

### ५. न्यूनताद्रूप्यरुपकम् - उदाहरणम्

"साध्वीयमपरा लक्ष्मीरसुधासागरोदिता"।

इयं साध्वी पतिव्रता असुधासागरोदिता क्षीरसमुद्रादनुत्पन्ना अपरा अन्या लक्ष्मीः अत्रापरा लक्ष्मीरित्यनेन प्रसिद्धलक्ष्मीभेदः अस्याः लक्ष्म्याः प्रतीयते। तथा च साध्व्यां लक्ष्मीत्वारोपे धर्ममात्रारोपपर्यवसायी। न सुधासागरोदितेति न्यूनत्वोक्त्या न्यूनताद्रूप्यरुपकम् ।

### ६. अधिकताद्रूप्यरुपकम् - उदाहरणम्

"अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते"।

अयं पुरोवर्ती मुखमेव चन्द्रः मुखचन्द्रः कलङ्किनः कलङ्कसहितात् चन्द्रात्प्रसिद्धेन्दोरतिरिच्यते अतिशयितो भवति कलङ्काभावात् । अत्रापि मुखे चन्द्रत्वारोपो धर्ममात्रारोपपर्यवसायी भेदस्य प्रतीयमानत्वात् कलङ्करहितत्वात् मुखचन्द्रस्योत्कर्षप्रतिपादनात् अधिकताद्रूप्यरुपकम् । इति सभेदो रुपकालङ्कारो निरुपितः ।

## २. अतिशयोक्तिः

अतिशयस्य लोकमर्यादातिवर्तिनः कविसम्मतस्य विशेषस्य उक्तिः अतिशयोक्तिः। दण्डिना अतिशयोक्तेर्लक्षणं एवं प्रतिपादितम्- "विवक्षा या विशेषस्य लोकसीमातिवर्तिनीति। इयमतिशयोक्तिः

अष्टधा भवति। (१) रूपकातिशयोक्तिः, (२) सापह्नवरूपकातिशयोक्तिः (३) भेदकातिशयोक्तिः, (४) सम्बन्धातिशयोक्तिः, (५) असम्बन्धातिशयोक्तिः, (६) अक्रमातिशयोक्तिः, (७) चपलातिशयोक्तिः, (८) अत्यन्तातिशयोक्तिः इति। एषां सोदाहरणं लक्षणमुच्यते।

**१. रूपकातिशयोक्तिः**

रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।
पश्य नीलोत्पलद्वन्द्वान्निस्सरन्ति शिताः शराः ।।

निगीर्य, विषयस्य स्वशब्देन उपादानं विना विषयिवाचकपदेनैव ग्रहणं कृत्वा, अध्यवसानतः विषयस्य विषयिरूपेण आहार्य निश्चयात् अतिशयोक्तिः स्यात्। यत्रोपमेयं मुखादिकं तद्वाचिमुखादि पदेन अनुपादाय उपमानवाचिचन्द्रादिपदैरेवोपादाय चन्द्रादिरूपेण अवधार्यते तत्र रूपकातिशयोक्तिरिति निष्कर्षः। हे सखि, नीलोत्पलद्वन्द्वात् शिताः तीक्ष्णाः शराः निस्सरन्ति निर्गच्छन्तीत्युदाहरणम्। अत्र विषयभूतकान्तालोचन-द्वन्द्वकटाक्षाणां तद्वाचिपदैः उपादानं विना विषयिवाचिनीलोत्पलशरशब्दाभ्यामेव उपादानं कृत्वा नीलोत्पलद्वन्द्वबाणाभेदाध्यवसानात् रूपकातिशयोक्तिः ।

**२. सापह्नवा रूपकातिशयोक्तिः**

यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता।
त्वत्सूक्तिषु सुधा राजन् भ्रान्ताः पश्यन्ति तां विधौ ।।

सैव रूपकातिशयोक्तिरेव यदि अपह्नवगर्भा निषेधघटिता तर्हि अपह्नवा रूपकातिशयोक्तिरिति मता उच्यते। हे राजन् तव सूक्तिषु मधुरवचनेषु सुधा अमृतं वर्तते इति शेषः। भ्रान्ताः अज्ञानिनः उन्मत्ता वा तां सुधां विधौ चन्द्रे पश्यन्ति जानन्ति। परमार्थतः चन्द्रे सुधा नास्तीति भावः। अत्र सूक्तिमाधुर्ये सुधात्वाध्यवसानस्य चन्द्रे सुधा नास्तीति निषेधगर्भत्वात् सापह्नवा रूपकातिशयोक्तिः ।

**३. भेदकातिशयोक्तिः**

"भेदकातिशयोक्तिः स्यात्तस्यैवान्यत्ववर्णनम् ।
अन्यदेवास्य गाम्भीर्यमन्यद्धैर्यं महीपतेः ।।

तस्यैव लोकप्रसिद्धस्यैव विषयस्य गाम्भीर्यादेः अन्यत्ववर्णनं अभेदेऽपि मेदवर्णनं भेदकातिशयोक्तिः। अस्य महीपतेः गाम्भीर्यं अन्यदेव, धैर्यमप्यन्यदेव लोकविलक्षणमेव इत्यत्र गाम्भीर्यधैर्ययोः लोकसाधारणत्वेऽपि (अभेदेऽपि) विलक्षणत्वं (भेदः) वर्णितमिति भेदकातिशयोक्तिः।

### ४. सम्बन्धातिशयोक्तिः

सम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम्।
सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् ।।

अयोगे असम्बन्धे सति योगकल्पनं सम्बन्धवर्णनं यत् सा सम्बन्धातिशयोक्तिः। अस्य पुरस्य सौधाग्राणि प्रासादशिखराणि विधुमण्डलं चन्द्रमण्डलं स्पृशन्ति इत्यत्र समुन्नतानां सौधशिखराणां वस्तुतः विधुमण्डलस्पर्शासम्बन्धेऽपि तत्सम्बन्धवर्णनात् सम्बन्धातिशयोक्तिः।

### ५. असम्बन्धातिशयोक्तिः

योगेऽप्ययोगोऽसम्बन्धातिशयोक्तिरितीर्यते।
त्वयि दातरि राजेन्द्र स्वर्द्रुमान्नाद्रियामहे ।।

योगे सम्बन्धे सत्यपि अयोगः असम्बन्धवर्णनं असम्बन्धातिशयोक्तिः इति ईर्यते उच्यते । हे राजेन्द्र; त्वयि दातरि वितरणशालिनि सति स्वर्द्रुमान् कल्पवृक्षान् न आद्रियामहे न याचामहे इति उदाहरणम्। राज्ञि दानशीले सत्यपि स्वर्द्रुमेषु सर्वेषामादरो भवत्येव। तथा च आदरयोगेऽपि 'नाद्रियामहे' इत्ययोगकल्पनात् असम्बन्धातिशयोक्तिः।

### ६. अक्रमातिशयोक्तिः

अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः।
आलिङ्गन्ति समं देव ज्यां पराश्च शराश्च ते ।।

हेतुकार्ययोः कार्यकारणयोः सहत्वे यौगपद्ये वर्ण्यमाने सति अक्रमातिशयोक्तिरिति लक्षणम् । कारणं पूर्वं कार्यं तदनन्तरमिति नियममुल्लङ्घ्य हेतुकार्ययोः एककालत्ववर्णनं अक्रमातिशयोक्तिरित्यर्थः। हे राजन् तव शराः बाणाः, पराः शत्रवश्च ज्यां मौर्वी भूमिं च समं युगपद् आलिङ्गन्ति इत्युदाहरणम् । अत्र मौर्व्यां शरसन्धानरूपकारणस्य शत्रूणां भूपतनरूपकार्यस्य च पौर्वापर्ये विद्यमानेऽपि यौगपद्यवर्णनादक्रमातिशयोक्तिः।

### ७. चपलातिशयोक्तिः

चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे ।
यास्यामीत्युदिते तन्व्या वलयोऽभवदूर्मिका ।।

कार्ये हेतुप्रसक्तिजे, हेतोः कारणस्य प्रसक्त्या ज्ञानमात्रेण कार्यस्य जननवर्णने चपलातिशयोक्तिः। यास्यामि दूरदेशं गमिष्यामि इति नायकेन उक्ते सति, विरहकारणज्ञानमात्रेण तन्व्याः नायिकायाः ऊर्मिका-

अङ्गुलीयकं वलयः हस्ताभरणं अभवदित्युदाहरणम्। अत्र भविष्यद्विरहरूपकारणस्य ज्ञानमात्रेण तन्व्याः कृशता सञ्जाता, यस्मादङ्गुलीयकं हस्ताभरणमभूदिति कार्योत्पत्तिवर्णनात् चपलातिशयोक्तिः।

### ८. अत्यन्तातिशयोक्तिः

अत्यन्तातिशयोक्तिः स्यात् पौर्वापर्यव्यतिक्रमे।
अग्रे मानो गतः पश्चादनुनीता प्रियेण सा"।।

कार्यकारणयोः पौर्वापर्यस्य पूर्वोत्तरक्रमस्य व्यतिक्रमे उल्लङ्घने सति अत्यन्तातिशयोक्तिः। पूर्वं कारणं पश्चात् कार्यं इति सिद्धं क्रममुल्लङ्घ्य कार्योत्पत्तेरनन्तरं कारणसम्भवर्णनं अत्यन्तातिशयोक्तिरित्यर्थः। मानः प्रणयकोपः अग्रे प्रथमं गतः, पश्चात् सा नायिका प्रियेण अनुनीता इत्यत्र प्रसिद्धकारणात् अनुनयात् पूर्वमेव कार्यस्य मानत्यागस्योत्पत्तिवर्णनात् (कार्यकारणयोः पौर्वापर्यविपर्ययरूपायाः) अत्यन्तातिशयोक्तेः उदाहरणमिदम् ।

## ३. अपह्नुतिः

अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिः।

यस्मिन् काव्ये असत्यं स्थापयितुं सत्यस्य तिरस्कारो वर्ण्यते तत्र अपह्नुतिरलङ्कारः। अयं षड्विधो भवति (१) शुद्धापह्नुतिः (२) हेत्वपह्नुतिः (३) पर्यस्तापह्नुतिः (४) भ्रान्तापह्नुतिः (५) छेकापह्नुतिः (६) कैतवापह्नुतिश्च ।

### १. शुद्धापह्नुतिः

शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः ।
नायं सुधाशुः, किं तर्हि व्योमगङ्गासरोरुहम् ।।

अन्यस्य अप्रकृतधर्मस्य आरोपार्थः आरोपफलकः धर्मनिह्नवः वर्णनीयधर्मनिषेधः शुद्धापह्नुतिः। उपमेये उपमानधर्मारोपफलकः उपमेयधर्मनिषेधः शुद्धापह्नुतिरिति निष्कर्षः । अयमाकाशे दृश्यमानः न सुधांशुश्चन्द्रः किन्तु व्योमगङ्गासरोरुहमित्युदाहरणम् । अत्र वर्णनीये चन्द्रे तत्सदृशाकाशगङ्गासरोरुहत्वारोपाय तदीयचन्द्रत्वनिषेधः कृत इति शुद्धापह्नुतिः। रूपकवदत्राप्यारोपोऽस्ति, किन्तु रूपके प्रकृतधर्मनिषेधो नास्तीति भेदः ।

### २. हेत्वपह्नुतिः

स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः।
नेन्दुस्तीव्रो, न निश्यर्कः, सिन्धोरौर्वोऽयमुत्थितः।।

स एवान्यस्यारोपार्थः प्रकृतधर्मापह्नव एव युक्तिपूर्वश्चेत् सहेतुको यदि क्रियते तर्हि हेत्वपह्नुतिः। यत्र अप्रकृतारोपफलके प्रकृतधर्मनिषेधे हेतुरपि निर्दिश्यते तत्र हेत्वपह्नुतिरिति निष्कर्षः। अयमाकाशे दृश्यमानो नेन्दुः चन्द्रो न, यस्मात् तीव्रः, अत्युष्णः, सूर्योपि न, निशि रात्रौ दृश्यमानत्वात्, सिन्धोः समुद्रात् और्वः बडवाग्निरयमुत्थितः इत्युदाहरणम् । अत्र चन्द्रत्वस्य सूर्यत्वस्य च निषेधे तीक्ष्णत्वं निशि दृश्यमानत्वं च क्रमेण हेतू निर्दिष्टौ। निषेधश्च प्रकृते चन्द्रे और्वत्वारोपार्थ इति लक्षणसङ्गतिः। विरहिणीवचनत्वाच्चन्द्रे तीव्रत्वोक्तिरुपपद्यते ।

### ३. पर्यस्तापह्नुतिः

अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः।

नायं सुधांशुः, किं तर्हि सुधांशुः प्रेयसीमुखम् । यत्रः सः, क्वचिद्वस्तुनि तदीयधर्मनिह्नवः, अन्यत्र वर्णनीये वस्तुनि तस्य धर्मस्यारोपार्थः तत्र पर्यस्तापह्नुतिः। पर्यस्ता आरोपव्यधिकरणा अपह्नुतिर्निषेध इति पर्यस्तापह्नुतिरन्वर्थसंज्ञा । अयं तु पुरोदृश्यमानः न सुधांशुः, चन्द्रो न, किन्तु प्रेयसीमुखं सुधांशुरित्युदाहरणम्। अत्र चन्द्रे सुधांशुत्वनिषेधः अन्यत्र वर्णनीये प्रेयसीमुखे तस्य सुधांशुत्वस्य आरोपार्थ इति लक्षणसमन्वयः।

### ४. भ्रान्तापह्नुतिः

भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे ।
तापं करोति सोत्कम्पं ज्वरः किं न, सखि, स्मरः ।।

अन्यस्य प्रकृतेतरस्य अतत्वस्य शङ्कायां सत्यां, भ्रमे सति इत्यर्थः, भ्रान्तेः भ्रमस्य वारणे तत्त्वाख्यानेन निवर्तने भ्रमविषयनिषेधात् भ्रान्तापह्नुतिः। तत्त्वकथनहतुकभ्रान्तिविषयनिषेध इति निष्कर्षः। मदनपीडिता नायिका वदति स्मरं मनसि कृत्वा 'सोत्कम्पं तापं करोति' इति। कम्पस्य तापस्य च ज्वरसाधारण्यात् ऋजुबुद्धिः सखी शङ्कते किंज्वर'? इति। नायिका 'न ज्वरः किन्तु स्मर' इति तत्त्वकथनपूर्वकं भ्रमविषयं ज्वरं निषिद्ध्य सख्याः भ्रमं वारयति। तदेवं' तापं करोति'- इत्यादि। श्लोकार्धं भ्रान्तापह्नुतेरुदाहरणम्। सादृश्याद् भ्रमे भ्रान्तिमदलङ्कारः। ततः तन्निषेधे भ्रान्तापह्नुतिः।

### ५. छेकापह्नुतिः

छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे।
प्रजल्पन् मत्पदे लग्नः कान्तः किं न हि नूपुरः ।।

अन्यस्य अनुद्दिष्टस्य श्रोतृजनस्य शङ्कातः शङ्काहेतोः (तात्विकवस्तुशङ्कयोः) तन्निवारणार्थं तथ्यस्य यथार्थस्य अभिप्रेतार्थस्य निह्नवे निषेधे छेकापह्नुतिः। छेको विदग्धः तत्कृता अपह्नुतिः छेकापह्नुतिरिति लक्ष्यनिर्देशः। वाक्यस्यान्यथायोजनेन शङ्कितः तात्त्विकवस्तुनिषेध इति लक्षणम् । 'प्रजल्पन्मत्पदे लग्न'-

इत्याद्युदाहरणम्। काचिन्नायिका स्वकान्तं मनसि निधाय आप्तसखीं वदति - प्रजल्पन् - यत्किमपि मामनुनेतुं प्रलपन् मत्पदे मम चरणे लग्नः प्रणत इति। अनाप्ता काचिद्यदृच्छया तद्वाक्यं श्रुत्वा शङ्कितत्तत्त्वार्था पृच्छति कान्तः किं? इति। तथा विदग्धा नायिका तथ्यगोपनाय प्रतिवदति - न हि कान्तः किन्तु नूपुर इति। अत्र नूपुर एव शब्दायमानः पादे लग्न इति वाक्यस्य अन्यथायोजनेन शङ्किततात्त्विकवस्तुनः कान्तस्य निषेधः वैदग्ध्येन कृत इति लक्षणसमन्वयः।

### ६. कैतवापह्नुतिः

कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः।
निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात् ।।

व्याजाद्यैः व्याजच्छलकैतवप्रभृतिभिः पदैः निह्नुतेः निषेधस्य व्यक्तौ स्फुटीकरणे कैतवापह्नुतिः। कान्तायाः दृक्पातकैतवात् दृष्टिप्रसरव्याजेन स्मरनाराचाः मन्मथ बाणविशेषाः निर्यान्ति निर्गच्छन्ति इत्युदाहरणम्। अत्र कैतवपदेन “नेमे कान्ताकटाक्षाः किन्तु स्मरनाराचा” इत्यपह्नवः प्रतीयते इत्यपह्नुतिनिरूपणम्।

## ४. समासोक्तिः

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ।।

प्रस्तुते प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषणसाम्याद् अप्रस्तुतस्य अप्रस्तुतवृत्तान्तस्यापि परिस्फूर्तिः प्रतीतिः चेत् समासोक्तिः। समासेन संक्षेपेण प्रस्तुताप्रस्तुतयोः उक्तिरित्यन्वर्थसंज्ञा। अयं रक्तः चन्द्रमाः ऐन्द्रयाः प्रचीदिशः मुखं प्रारम्भभागं चुम्बति, स्पृशति पश्य इत्युदाहरणम्। अत्र चन्द्रोदयवर्णने प्रस्तुते रक्तादिविशेषणसाम्यात् नायिकानायकवृत्तान्तस्याप्रस्तुतस्य प्रतीतेः लक्षणसमन्वयः। तथा हि रक्तशब्दस्य श्लेषेण लोहितानुरक्तसाधारण्यात् मुखशब्दस्य प्रारम्भवदनसाधारण्यात् चुम्बतीत्यस्य स्पर्शवदनसंयोगसाधारण्यात्, ‘चन्द्रमः’ शब्दगतपुल्लिङ्गेन ऐन्द्री शब्दगतस्त्रीलिङ्गेन तत्प्रतिपाद्येन्द्रसम्बन्धित्वेन च परवनितासक्तकामुकवृत्तान्तः प्रतीयते, स च प्रतीतोऽर्थः प्रस्तुतमेव चन्द्रोदयवृत्तान्तं उपस्करोति इत्यलङ्कारत्वम्। समासोक्तौ अप्रस्तुतव्यवहारसमारोपः, रूपके तु अप्रस्तुतरूपसमारोपः इति भेदः। इति समासोक्तिः।

## ५. विरोधाभासः

आभासत्वे विरोधस्य विरोधाभास इष्यते।
विनापि तन्वि हारेण वक्षोजौ तव हारिणौ ।।

विरोधस्य आभासत्वे आपाततः स्फुरणे; पर्यवसाने तत्परिहारे च सति विरोधाभासो नाम अलङ्कार इष्यते। हे तन्वि, सुन्दरिः तव वक्षोजौ स्तनौ हारेण विनापि हारिणौ हारवन्तौ मनोहारिणौ च इत्यत्र हारेण

विनापि हारिणाविति विरोधः स्फुरति। ततश्च हारिणावित्यस्य मनोहारिणावित्यर्थयोजनया विरोधपरिहारात् विरोधामासः ।

## ६. दृष्टान्तालङ्कारः

चेत् बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः।
त्वमेव कीर्तिमान् राजन् विधुरेव हि कान्तिमान् ।।

वाक्ययोरित्यनुवर्तते। वाक्ययोः उपमानोपमेयवाक्ययोः बिम्बप्रतिबिम्बत्वं चेत्, भिन्नावेव धर्मौ सादृश्यादिभिन्नत्वेन अध्यवसितौ पृथक् निर्दिष्टौ चेत् तर्हि दृष्टान्तः अलङ्कृतिः अलङ्कारः। हे राजन् त्वमेव कीर्तिमान्, विधु चन्द्र एव कान्तिमान् इत्युदाहरणम्। अत्र प्रथममुपमेयवाक्यं, द्वितीयमुपमानवाक्यम्। तयोः कीर्तिमत्वकान्तिमत्वरूपौ धर्मौ बिम्बप्रतिबिम्बत्वभावेन निर्दिष्टौ इति लक्षणसमन्वयः।

## ७. तुल्ययोगितालङ्कारः।

तुल्यानां सादृश्यवतां योगिता एकधर्मान्वियित्वं तुल्ययोगिता। सा चतुर्विधा- (१) प्रस्तुतैकधर्मान्वयरूपा, (२) अप्रस्तुतैकधर्मान्वयरूपा (३) हिताहितवृत्तितौल्यरूपा (४) उत्कृष्टसमीकरणोक्तिरूपा चेति।

### (१) प्रस्तुतैकधर्मान्वयरूपा।

वर्ण्यानामितरेषां धर्मैक्यं तुल्ययोगिता ।
सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च ।।

वर्ण्यानां प्रस्तुतानामेव, अथवा इतरेषां अप्रस्तुतानामेव धर्मैक्यं गुणक्रियारूपैकधर्मान्वयः तुल्ययोगितालङ्कारः। यत्र द्वयोः प्रस्तुतयोरेव, बहूनां प्रस्तुतानामेव वा एकधर्मान्वयः वर्ण्यते तत्र प्रस्तुतैकधर्मान्वयरूपा तुल्ययोगिता। सरोजानि पद्मानि स्वैरिणां अभिसारिकाणां वदनानि मुखानि च सङ्कुचन्ति सङ्कोचं प्राप्नुवन्ति इति उदाहरणम् । चन्द्रोदये सरोजानि सङ्कुचन्ति निमीलन्ति, स्वैरिणीवदनानि च प्रकाशभयात् सङ्कुचन्ति। तथा च वर्ण्यानामेव सरोजानां स्वैरिणीवदनानां च सङ्कोचरूपैकक्रियान्वयवर्णनात् प्रस्तुतैकधर्मान्वयरूपा तुल्ययोगिता।

### (२) अप्रस्तुतैकधर्मान्वयरूपा

यत्र द्वयोः बहूनां वा अप्रस्तुतानामेव एकधर्मान्वयः तत्र अप्रस्तुतैकधर्मान्वयरूपा तुल्ययोगिता। अस्या इदमुदाहरणम्-

त्वदङ्गमार्दवे दृष्टे कस्य चित्ते न भासते ।
मालतीशशभृल्लेखा कदलीनां कठोरता ।।

हे प्रिये, तव अङ्गमार्दवे दृष्टे सति कस्य सचेतसः चित्ते मालतीकुसुमचन्द्रलेखाकदलीनां कठोरता न भासते? इति अप्रस्तुतैकधर्मान्वयरूपायाः तुल्ययोगितायाः उदाहरणम्। अत्र नायिकासौकुमार्यवर्णने प्रस्तुते अप्रस्तुतानां मालतीशशभृल्लेखाकदलीनां कठोरतारूपैकगुणान्वयवर्णनात् अप्रस्तुततुल्ययोगिता।

**(३) हिताहितवृत्ति तौल्यरूपा**

हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता ।
प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया ।।

हिताहिते मित्रामित्रविषये वृत्तेः व्यापारस्य तौल्यं साम्यं एकविधव्यवहरणं अपरा अन्या तृतीया तुल्ययोगिता। हे राजन्! त्वया मित्रशात्रवयोः विषये (मित्रेभ्यः शत्रुभ्यश्च) पराभूतिः परा उत्कृष्टाभूतिरैश्वर्यं, पराभवश्च प्रदीयते इत्युदाहरणम्। अत्र हिते मित्रे, अहिते शत्रौ च पराभूतिदानरूपसमानव्यापारवर्णनात् तुल्ययोगिता। उत्कृष्टभूतिदानस्य पराभवदानस्य च श्लेषेण अभेदाध्यवसानात् तुल्यत्वम्।

**(४) उत्कृष्टसमीकरणोक्तिरूपा**

गुणोत्कृष्टैः समीकृत्य वचोन्या तुल्ययोगिता ।
लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ।।

गुणोत्कृष्टैः शौर्यादिगुणैः श्रेष्ठैः समीकृत्य समानं कृत्वा, साम्यं विवक्षित्वा वचः वचनं वर्णनं अन्या चतुर्थी तुल्ययोगिता। उत्कृष्टगुणैः धर्मतः समानीकृत्य वर्णनं अन्या तुल्ययोगितेत्यर्थः। यमः, पाशी-वरुणः श्रीदः-कुबेरः, शक्रः- इन्द्रः भवानपि लोकपालः इत्यत्र वर्णनीयो राजा उत्कृष्टगुणैर्यमादिभिः लोकपालत्वरूपधर्मतः समानीकृत्य वर्णित इति लक्षणसमन्वयः।

## ८. काव्यलिङ्गालङ्कारः

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् ।
जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः ।।

समर्थनीयस्य समर्थनापेक्षस्य अर्थस्य समर्थनं काव्यलिङ्गं नाम अलङ्कारः। हे मन्द मूढकन्दर्प त्वं जितोऽसि, मम चित्ते त्रिलोचनः अस्तीत्युदाहरणम्। अत्र मदनजयस्य दुष्करत्वात् तज्जयोपन्यासः समर्थनमपेक्षते। स्वान्तःकरणे मदनदाहकत्रिलोचनसन्निधानप्रदर्शनेन तत्समर्थनं कृतमिति काव्यलिङ्गम्। समर्थको हेतुः वाक्यार्थः पदार्थो वा भवति। 'मच्चित्तेऽस्ति त्रिलोचनः' इत्यत्र वाक्यार्थो हेतुः।

## ९. स्वभावोक्तिः

स्वभावोक्तिः स्वभावस्य जत्यादिस्थस्य वर्णनम्।
कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते ।।

जात्यादिस्थस्य जातिक्रियागुणादिसम्बन्धिनः स्वभावस्य वर्णनं स्वभावोक्तिरलङ्कारः। उत्तरङ्गाक्षैः चञ्चललोचनैः स्तब्धकर्णैः निश्चलश्रोत्रैः कुरङ्गैः हरिणैः उदीक्ष्यते इत्यत्र कुरङ्गस्वभाववर्णनात् स्वभावोक्तिः।

## १०. अप्रस्तुतप्रशंसा

अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया ।
एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ।।

अप्रस्तुतस्य प्रशंसा वर्णनं यत्र प्रस्तुताश्रया वस्तुवृत्तान्तावगतिपर्यवसायिनां सा अप्रस्तुतप्रशंसा। यत्र प्रस्तुतवृत्तान्तावगमनोद्देशेन अप्रस्तुतवृत्तान्तो वर्ण्यते तत्र अप्रस्तुतप्रशंसा इति निष्कर्षः। शकुन्तेषु पक्षिषु मध्ये यः शक्राद् अन्यं इन्द्रादन्यं प्रभुं न याचते स एकः चातक एव कृती कुशल इत्युदाहरणम्। अत्र सार्वभौमं विना अन्यं क्षुद्रं प्रभुं न प्रार्थये इत्यभिमानशालिनो वृत्तान्तस्य प्रस्तुतस्य प्रत्यायनार्थं तत्सदृशचातकवृत्तान्तो वर्णित इति लक्षणसङ्गतिः।

# छन्दांसि

## १. अनुष्टुप् (श्लोकः)

**लक्षणम्**

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयादेतच्छ्लोकस्य लक्षणम् ।।

श्लोके चत्वारः पादाः सन्ति। सर्वेषु पादेषु पञ्चमो वर्णः लघु भवति, तथा द्वितीयचतुर्थपादयोः सप्तमो वर्णो लघु भवति। सर्वेषु पादेषु षष्ठो वर्णो गुरुः भवति।

उदाहरणम् यथा रामायणे

मा निषाद, प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।। इत्यत्र सर्वेषु पादेषु पञ्चमो वर्णाः प्र, श, थु, म च लघु भवन्ति। तथा द्वितीयचतुर्थपादयो सप्तमौ स, हि इति वर्णौ लघु भवतः तथा च चतुर्षु पादेषु षष्ठो वर्णाः ति, तीः, ना, मो च गुरुः भवन्ति।

## २. उपेन्द्रवज्रा

**लक्षणम्**

उपेन्द्रवज्रा जतजास्ततो गौ।
उपेन्द्रवज्रायां एकादश वर्णाः सन्ति एकस्मिन् पादे।

अत्र यथाक्रमं जगणः तगणः जगणश्च आगच्छति। तदनन्तरं द्वौ वर्णौ गुरुः च भवतः।

उदाहरणम् यथा कुमारसम्भवे प्रथमे सर्गे

'वनेचराणां वनितासखानां' इत्यत्र "वनेच" इति जगणः, "राणांव" इति तगणः "नितास" इति जगणः तथा खा, नां इति द्वौ वर्णद्वयं गुरुः च भवति।

## ३. रथोद्धता

**लक्षणम्**

"रान्नराविह रथोद्धता लगौ।"
रथोद्धतायां एकादश वर्णाः सन्ति एकस्मिन् पादे।

अत्र यथाक्रमं रगणः, नगणः, पुनः रगणश्च आगच्छति।

ततः परं अक्षरद्धयं यथाक्रमं लघु, गुरुःच भवतः।

उदाहरणम् यथा रघुवंशस्य एकादशसर्गे-

"कौशिकेन स किल क्षितीश्वरः" इत्यत्र कौशिके इति रगणः, नसकि इति नगणः, लक्षिति इति रगणः, ख्र इति लघु, रः इति गुरुश्च भवति

## ४. मन्दाक्रान्ता

**लक्षणम्**

मन्दाक्रान्ता, जलधिषडगौ म्भौ नतौ ताद्गुरुचेत् ।

अस्मिन् छन्दसि सप्तदशवर्णाः सन्ति एकस्मिन् पादे। अत्र क्रमेण मगणः भगणः, नगणः, तगणः तगणः तथा अक्षरद्धयं गुरुश्च भवति। एवञ्च चतुर्थवर्णे, दशमवर्णे सप्तदशवर्णे च यतिः भवति। लक्षणे जलधिषडगौ इत्युक्तं, तस्यायमर्थः। जलधिः = ४ (समुद्राः) षष्ठः (4 + 6 = 10) अगः = ७ (पर्वताः)
उदाहरणं यथा वेदान्तदेशिकस्य हंससन्देशे

'वंशे जातः सवितुरनघे मानयन् मानुषत्वं', इत्यत्र वंशेजा इति मगणः, तः सवि इति भगणः, तुरन इति नगणः, घेमान इति तगणः, यन्मानु इति च तगणः दृश्यते, तथा अन्तिमं वर्णद्धयं (षत्वं इति) गुरुः भवतिः) अपि च वंशेजातः, सवितुरनधे, मानयन्मानुषत्वं इति त्रिषु स्थानेषु यतिर्भवति।

# ५. शार्दूलविक्रीडितम्

**लक्षणम्**

सूर्याश्वैर्मसजास्ततास्सगुरवः शार्दूलविक्रीडितम् ।। शार्दूलविक्रीडितस्य एकस्मिन् पादे एकोनविंशतिः वर्णाः सन्ति। अत्रं क्रमेण मगणः, सगणः, जगणः, सगणः, द्वौ तगणौ च भवन्ति। अन्तिमो वर्णो गुरुर्भवति। तथा द्वादशैकोनविंशतिवर्णयोरनन्तरं यतिर्भवति। लक्षणे सूर्यशब्देन द्वादश, अश्शब्देन सप्त च संख्या सूच्यते ।

उदाहरणं यथा जयदेवस्य गीतगोविन्दे-

"आवासो विपिनायते प्रियसखी, मालापि जालाय ते" इत्यत्र आवासो इति मगणः, विपिना इति सगणः, यते प्रि इति जगण, यसखी इति सगणः, मालापि इति तगणः जालाय इत्यपि तगणः ते इति गुरुश्च भवति। तथा च प्रियसखी, जालायते इति स्थलद्वये यतिर्भवति।

# ६. मालिनी

**लक्षणम्**

ननमयययुतेयं मालिनी भोगिलोकैः।

मालिन्यां एकस्मिन् पादे पञ्चदशवर्णाः सन्ति। अत्र क्रमेण नगणः, पुनः नगणः मगणः, यगणः, पुनरपि यगणश्च आगच्छति तथा अष्टमपञ्चदशवर्णयोरनन्तरं यतिर्भवति। लक्षणे भोगिशब्देन अष्टसंख्या, लोकशब्देन सप्तसंखा च सूच्यते (8 + 7 = 15)

उदाहरणम् यथा शाकुन्तले

सरसिजमनुविद्धं शैवलेनापि रम्यं इत्यत्र सरसि इति नगणः, जमनु इति च नगणः, विद्धंशै इति मगणः, वलेना इति पिरम्यं इति च यगणौ भवन्ति। अपि च अनुविद्धं, रम्यं इत्यनयोरनन्तरं यतिश्चभवति।

# ७. इन्द्रवज्रा

**लक्षणम्**

'स्यादिन्द्रवज्रा यदि तौ जगौ गः।

एकादशाक्षरयुक्ता इन्द्रवज्रा। अत्र द्वौ तगणौ, जगणश्च भवन्ति। तथा अन्तिमं वर्णद्वयं गुरुश्च भवति। उदाहरणम् यथा कालिदासस्य कुमारस्भवे "आमेखलं सञ्चरतां घनानां" इत्यत्र आमेख इति तगणः, लंसञ्च इति च तगणः। रतांघ इति जगणः, नानां इति वर्णद्वयं गुरुश्च भवन्ति।

# ८. वंशस्थम्

**लक्षणम्**

जतौ तु वंशस्थमुदीरितं जरौ

वंशस्थवृत्ते द्वादशवर्णास्सन्ति। अत्र क्रमेण, जगणः, तगणः, जगणः, रगणश्च भवन्ति उदाहरणं यथा शिशुपालवधे

'चयस्त्विषामित्यवधारितं पुरा' इत्यत्र चयस्त्वि इति जगणः, षामित्य इति तगणः, वधारि इति जगणः, तंपुरा इति रगणश्च भवन्ति।

# ९. स्रग्धरा

**लक्षणम्**

म्र भ्नै र्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।

एकविंशतिवर्णयुक्ता भवति स्रग्धरा । अस्मिन् छन्दसि क्रमेण मगणः, रगणः, भगणः, नगणः, तथा यगणत्रयञ्च विद्यते। सप्त, चतुर्दश एकविंशतिः इति वर्णानन्तरं यतिः। दृश्यते अतः लक्षणे 'त्रिमुनियतियुता' इत्युक्तम्। अत्र मुनिशब्दः सप्तर्षिसङ्कल्पेन सप्तसंख्यां सूचयति। उदाहरणं यथा अभिज्ञानशाकुन्तले-

"या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री" इत्यत्र यासृष्टिः इति मगणः, स्रष्टुरा इति रगणः, द्यावह इति भगणः, तिविधि इति नगणः, हुतं या, हविर्या, चहोत्री इति त्रिषु यगणश्च भवति। तथा स्रष्टुराद्या, हुतं, होत्रीति त्रिषु स्थानेषु यतिश्च भवति।

# १०. वसन्ततिलका

**लक्षणम्**

'उक्ता वसन्ततिलका तभजा जगौगः।

वसन्ततिलकायां चतुर्दशवर्णाः सन्ति। अत्र क्रमेण तगणः, भगणः, जगणः, पुनः जगणः, गुरुद्वयञ्च भवन्ति। उदाहरणं यथा अभिज्ञानशाकुन्तले-

'यस्य त्वया व्रणविरोपणमिङ्गुदीनां' इत्यत्र यस्यत्व इत्यत्र तगणः, याव्रण इत्यत्र भगणः, विरोप इत्यत्र जगणः, णमिङ्गु इत्यत्र च जगणः दी नामिति गुरुद्वयञ्च भवति ।